
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥ निदानग्रंथ॥

Acc. No. ~~8473.~~ M-1864
Title. - माधवनिदानम् (सटिप्पणं)
Author - ?
Date - ?
Sub - आयुर्वेद
folio - 32.
Xerox - 64.

॥१॥

॥श्रीगणनाथं नमामि॥ श्रीभा[illegible]॥ दन्त्येन नमः॥ श्रीकामेश्वरांकनिलयायै नमः॥ अथ माघ
वनिदानं सटिप्पणं लिख्यते॥ तुळसीकुसुमं दधतमालप्रतिमं दलद्विपगोपबालसकं॥
किमपि त्रिभवैकमूलकंदं परमानंदमहं महः स्मरामि॥१॥ श्रीहम्मीरनरेश्वरः समभवद्वी
रप्रतापानलज्वालामालकरालदग्धपवनप्रासारमुष्कंधनं॥ यस्य प्रौढसभांगणे
ष्वपि यत्राः स्वर्लोककल्लोलिनीकल्लोलामलनामनाः सुमनसो गायंति सारोमांचिताः
॥२॥ प्रत्यर्थिक्षितिनाथसार्थकनृतावे धर्मदीक्षागुरोः शौर्यं यस्य रणांगणे सुर
गणैः पत्रमन्सुराणां पतिः॥ लब्ध्वाने त्रसहस्रजंफलमलंस्म त्वानिजाप्यर्थितं रा
मं रावणघातिनं नसमभूत्तुष्टो विलक्षः पुनः॥ आत्तस्यामवदेद्घवरप्रफुल्लविश्वा
सपत्रं द्विजश्च रिक्तः॥ प्रमोदनामा सकलप्रमोदी कलाविलासैः कनिधिर्द्विजेंद्रः
॥४॥ ज्येष्ठो भव तस्य सुतः प्रभूतः शास्त्रार्थवेत्ता शिवशक्तिचेताः॥ रैत्रामना
मा प्रथितः कलाभिर्महस्मदक्षोणिपतेः सभायां॥५॥ जन्मोपि तस्यास्ति सुतः क

वीनां वाचस्पतिः सत्वगुणैकसंगतिः ॥ महोदरश्रीलितमाः सनत्स्नायं व येविज्ञाः स्वयम
ध्यजीवयन् ॥ ६ ॥ भृगुवच ॥ वनविचारैर्ध्यातुरं तच्चरित्रं चरकं चतुरश्चेतः श्रुत्वा कृतेषु
श्रुतेयः ॥ कपिलमतिवयस्यैस्त्रं महाविद्यारहस्य विज्ञाय तार्किकवरैः कविचारवैद्यैः ॥
वैद्यम्पूरं फणवज्ञानमधुकोशाबंधं ॥ ८ ॥ ॥ अथ ग्रंथारंभे प्रारब्ध ग्रंथपरिस
माप्त्यर्थं ग्रंथश्रोतृ ॥ मपि सकल्मषापोहार्थं शिष्टाचार परिपालनार्थं च ग्रंथकारः प्राक्
विशिष्टेष्ट देवता प्रणामं बंधवान् ॥ सुगमं ॥ मया रोगविनिश्चयो ग्रंथो निबध्यत इति म
संबंधः ॥ किं कृत्वा ॥ प्रणम्य ॥ प्रकर्षाद्योतकेन प्रशब्देन ग्रंथकृत लक्षणफलत्वमुक्तिशा
यं कारत्वा प्रमति ॥ कं शिवं ॥ सकलभुवनपतेर्महेश्वरस्य नामबाहुल्येपि त
दध्यापककल्याणमभिलषतः ग्रंथकारः शिवपदं निबद्धवान् ॥ कीदृशं शिवं ॥
जगदुत्पत्तिस्थितिसंहारकारणं ॥ जगच्छब्देनोत्पत्तिमंतः पृथिव्यादयः ज
भिधीयंते ॥ तेषामुत्पत्तौ सकारणसमवाये ॥ स्थितौ कालि निकालान्तरस्थाने

।२।

संहारे प्रध्वंसे ॥ कारणं कर्तरि हेतुं ॥ पुनः कीदृशं ॥ स्वर्गापवर्गयोर्द्वारं ॥ स्वर्गः सुखं ॥
अपवर्गो मोक्षः ॥ तयोर्द्वारमुपायं प्रधानकारणं ॥ पुनः कीदृशं ॥ त्रैलोक्यशरणं ॥ भुवनत्रय
स्य रक्षितारं ॥ १ ॥ छ ॥ प्रणम्य जगदुत्पत्तिस्थितिसंहारकारणं ॥ स्वर्गापवर्गयोर्द्वारं त्रै
लोक्यशरणं शिवं ॥ १ ॥ नानामुनीनां वचनैरिदानीं समासतः सद्भिषजां नियोगात् ॥ सो
पद्रवारिष्टनिदानलिंगो निबध्यते रोगविनिश्चयोयं ॥ २ ॥ नानामुनीनामित्यादि ॥ अयं रो
गनिश्चयो ग्रंथो निबध्यते विधीयते ॥ रोगाणां विनिश्चयो नं यस्मात् स तथा ॥ किं वि
शिष्टः ॥ सोपद्रवारिष्टनिदानलिंगः ॥ सह उपद्रवादिभिर्वर्त्तत इति स तथा ॥ उपद्रवो रोगा
रंभकदोषप्रकोपजन्योन्यो विकारः ॥ नियतमरणख्यापकलिंगमरिष्टं ॥ निदानं रोगो
त्पादकहेतुः ॥ लिंगं रोगाख्यापकहेतुः ॥ तेन लिंग्यते ज्ञायते अनेनेति व्युत्पत्त्या पूर्व
रूपोपशयसंप्राप्तयोपि धियंत इति ॥ ननु सर्वज्ञानविषये परमसूक्ष्मे निदानादिलक्षणो
ने असर्वज्ञपुरुषवाक्ये ॥ कथं बुद्धिमतां प्रवृत्तिरित्यत आह ॥ नानामुनीनां वचनैः ॥ ।८।
योगर्द्धिबलात् ॥ त्रैकालिकज्ञानदर्शिपुरुषातिशयो मुनिरुच्यते ॥ इदानीमिति ॥ अस्मा

भिरे वप्राधान्येन नानामुनीनां वचनैरेवं विधोयं ग्रंथः क्रियते ॥ अन्यैराचार्यैः पूर्वमेवं विधः संग्र
हग्रंथो न कृतः भूत्यर्थः ॥ समास इति संक्षेपात् ॥ ननु कृते ग्रंथे न कश्चिद्भिषक् प्रवर्तत इत्य
श्रस्य ॥ ॥६॥ उक्तं चरके ॥ व्याधेरुपरियो व्याधिर्भवत्कन्तर कालजः ॥ उपक्रमविरोधिन्विस्तउ
द्र्वउच्यते ॥ इति ॥ वैयर्थ्यं स्यात् इत्यत आह ॥ स भिषजां नियोगात् ॥ नियोगो नियोजि जता ॥
अथवा नियोग आज्ञा ॥ अस्माकमुपकाराय ग्रंथः क्रियतामेवंभूता प्रार्थ्यः ॥ २ ॥ ॥ ॥
नानातंत्रविहीनानां भिषजामल्पमेधसां ॥ सुखं विज्ञातुमातंकमयमेव भविष्यति ॥ ३ ॥ ७
ग्रंथस्योत्कृष्टमाह ॥ महाबुद्धयोपि दुरधिगमं तंत्राध्ययनं क्षमा भवंति ॥ अतो नानातंत्रवि
हीनां अल्पबुद्धीनां भिषजां सुखं यथा भवति तथा ॥ आतंकं रोगं ज्ञातुं कर्तुं ॥ अयमेव ग्रंथो
भविष्यतीति कारणमिति शेषः ॥ रोगज्ञानार्थमेवादौ युक्तः कार्यो भिषग्वरैः ॥ सति त
स्मिन् क्रियारंभः पुण्याप यशसे श्रिये ॥ रोगमादौ परीक्षेत ततोनंतरमौषधमिति ॥ ८ ॥ ॥
निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा ॥ संप्राप्तिश्चेति विज्ञानं रोगाणां पंचधा स्मृतं ॥ ४ ॥
व्याधेः ज्ञातमस्य पंच ज्ञानोपाया भवंति तानाह ॥ निदानं पूर्वरूपं उपशयः संप्राप्तिश्चेति

एते पंच व्यस्ताः समस्ताश्च व्याधिबोधकाः॥ रोगाणां विज्ञानं विशिष्टं ज्ञानं॥ पंचधा पंचप्रकारेण
॥२॥ स्मृतं कथितं॥ मुनिभिर्हेतुरिति शेषः॥ उपशायस्तथेति॥ यथा निदानं पूर्वरूपं रूपाणि रोगाणां
विज्ञानं॥ तथा उपशयोपि इति तुल्यकक्ष्यतां द्योतयति॥ एवं संप्राप्तिश्च॥ इतिशब्दः परिसमा
प्तौ॥ रोगाणां तत्र निदानं॥ संनिकृष्टविप्रकृष्टभेदेन द्विधा भवति॥ संनिकृष्टं यथा॥ वाता
दयः प्रकुपिताः ज्वरादिरोगमुत्पादयंति॥ अन्यच्च॥ नक्तंदिनर्तुभुक्तांशाद्दोषकोपस्य हेतु
वः॥ नैते चयादि कमपेक्ष्यंते वि। प्रकृष्टं यथा॥ हेमंते निचितः श्लेष्मा वसंते च प्रकुप्यति
॥ आहारादिरपि॥ कटुकाम्लादिकं पित्तज्वरस्य॥ पूर्वरूपं यथा॥ ज्वरस्येवालस्यादयः॥ रू
पं यथा॥ अंगमापगमं क्षोभकाठिन्यमहतोष्मणां॥ वैषम्यं तत्र तत्रांगे॥ तास्ताः स्यु
र्वेदनाश्चलाः॥ इत्यादि॥ उपशायो यथा वातं॥ स्नेहनमर्दनादिना उपशांतमुपलक्ष्यते त
स्योपशायद्वस्कच्यते॥ संप्राप्तिर्यथा॥ यथा दुष्टेन दोषेणेत्यादि लक्षणाग्रे वक्ष्यते॥ ॥२॥
ननु एकेनैव रोगनिश्चये अन्येषामुपादानं व्यर्थं॥ भिन्नप्रयोजनत्वात्॥ तद्यथा॥
निदानेनाधिगमे व्याधेस्तत्परिवर्जनमिति॥ उक्तं च सुश्रुते॥ संक्षेपतः क्रियायो

गेनिदानपरिवर्जनमिति॥ पूर्वरूपेणापिगतस्य व्याधेस्तं श्लोकः क्रियाक्रमो लभ्यत इति॥
॥ ॥हरिद्रवर्णं रुधिरं च मूत्रं विना प्रमेहस्य च पूर्वरूपैः॥ यो मूत्रयेत्तं न वदेत्प्रमेहं सरक्त
इति३ पित्तस्य च तु प्रकोपः॥ उक्तं चरके॥ ज्वरस्य पूर्वरूपे लंघनमपतर्पणं चेति॥ तथा सुश्रु
ते॥ वातिकज्वरस्य पूर्वरूपे घृतपानमिति॥ तथा च साध्यासाध्यत्वमपि ज्ञायते॥
उक्तं चरके॥ पूर्वरूपाणि सर्वाणि ज्वरोक्तान्यतिमात्रया॥ यं विशन्ति विशत्येनं मृत्यु
र्ज्वरपुरःसरः इति॥ अन्यस्यापि च रोगस्य पूर्वरूपाणि यं नरं॥ विशन्त्यनेन कल्पेन
तस्यापि मरणं ध्रुवं॥ रूपमाह॥ असलिरूपाभिधाने व्याधेरशेषविशेषस्य रूपमेव
न परिच्छिद्येत साध्यासाध्यत्वं च न ज्ञायते॥ अतो रूपमिति॥ रूपेणापि च व्याधेः
सुखसाध्यकष्टसाध्यासाध्यत्वं ज्ञायते॥ यतः अल्परूपः सुखसाध्यो व्याधिः॥
मध्यमरूपः कष्टसाध्यः॥ संपूर्णरूपस्त्वसाध्य इति॥ तथा च सुखसाध्यलक्षणे च
रकः॥ हेतवः पूर्वरूपाणि रूपाण्यल्पानि यस्य वै॥ न च तुल्यगुणो दूष्यो न दोषः प्र
कृतिर्भवेत्॥ इति॥ कष्टसाध्यलक्षणे चरकः॥ निमित्तपूर्वरूपाणां रूपा ...

मेबले इत्यादि ॥ संपूर्णरूपसन्निपातज्वरो ऽसाध्य इति ॥ उपन्नयेन अप्रील(?) व्याधेः

॥ ४ ॥ संकीर्णलक्षणेन जातिप्र... लक्षणेन वा विशेषे विबोधो न स्यात् ॥ उक्तं हि चरके ॥

गूढलिंगं व्याधिमुपशयानुपशयाभ्यां परीक्षेतेति ॥ तथा च सुश्रुते ॥ उत्पन्नम

स्नेहस्वेदाद्यैर्वा तत्संयोगेन शाम्यति ॥ विकारस्तत्र विज्ञेयो दुष्टमात्रस्तिशो मितं ॥

शोणितं तसेकस्तत्रोपशम इति ॥ आसन्नां च संप्राप्तो पूर्वरूपादिभिः प्रतिलक्ष्य

पि व्याधेश्चिकित्सितोपयोगः अंशांशसमविकल्पबलकालादीनामज्ञाने चिकित्सा

विशेषो न स्यात् ॥ तस्मान्निदानादिपंचकविज्ञानेन सर्वरोगविशेषेण बुध्य

त इति ॥ ४ ॥ ॥ निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः ॥ निदानमाहुः पर्या ५

येः प्राक्प्रयंयेन लक्षते ॥ ५ ॥ ॥ अथ निदानशब्दस्य पर्यायशब्दानाह ॥ निमित्तादिप

ङ्क्तिरेव पर्यायैः ॥ निदानमाहुः ॥ मुनय इति शेषः ॥ एतत्पर्यायकथने ॥ शास्त्रेव्यवहा ॥ ५ ॥

रोय ॥ तत्र तत्र शास्त्रोपदेशो निदानमेतैः पर्यायैर्बोधव्यमिति ॥ एकार्थवाचकाः ॥

शब्दाः परस्परपर्यायाः उच्यंते ॥ ॥ अथप्राग्रूपलक्षणमाह ॥ येन जृंभालस्याऽरुच्यादिना
उत्पित्सुः उत्पित्सुरामयोज्वरादिर्लक्ष्यते ज्ञायते तत्प्राग्रूपं ॥ भाविव्याधिबोधकलिंग
मित्यर्थः ॥ किंभूतः आमयः दोषविशेषेण वातादिनाऽनधीष्ठितः अनासादितः ॥
तर्हि वातादिदोषेणानधिष्ठितत्वात् ॥ माधवे उत्पित्सुर्लेवनघटते ॥ कारणाभावात् ॥
न हि वातादीन्विहाय व्याधेः प्राचेणाप्यतमः संभवः संभाव्यते ॥ तथापि ॥ सर्वेषामे
वरोगाणां निदानं कुपिता मलाः ॥ इति ॥ ५ ॥ १ ॥ ॥ उत्पित्सुरामयोदोषविशेषेणा
नधीष्ठितः ॥ लिंगमव्यक्तमल्पत्वाद्व्याधीनां तु यथायथं ॥ ६ ॥ १ ॥ ॥ तस्मा
द्दोषविशेषेणानधीष्ठितत्वं उत्पित्सोरामयस्य यदुच्यते ॥ तत्तु व्यक्तरूपदोषापेक्षयाऽ
वगंतव्यं ॥ तत्प्राग्रूपं ॥ उत्पित्सूनां ज्वरादीनां अल्पत्वात् दनासादितबलत्वादव्यक्तं
लिंगं ॥ अस्पष्टलक्षणं ॥ तद्यथायथमिति ॥ येन यदा व्याधेः ज्वराद्यन्यतमस्याले
यमवगंतव्यं ॥ तच्च प्राग्रूपं द्विविधं सामान्यं विशिष्टं च ॥ येन दोषादुष्यमूर्णनावस्थाज

॥५॥

नितेन भाविज्वरादिव्याधिमात्रं प्रतीयते ॥ तद्विशिष्टं ॥ यथा ॥ जृंभात्यर्थं समीरणात् ॥
पित्तान्नयनयोर्दाहः ॥ कफान्नान्नाभिनंदनमिति ॥ अत्र तु विशिष्टे प्राग्रूपे जृंभादिरू
पं दृष्ट्वा रूपत्वमेवं न त्वेवं तत्कव्यव्याध्यारंभकदोषस्य सूक्ष्मचिन्हरूपत्वात् ॥ तेनादि
चये पतिते अग्निकणे सूक्ष्मत्वात् धूममात्रं व्यक्तं ज्ञात्वा करवस्त्रादिताडनमूलीका
रैः तदुपशमः कर्तुं शक्यते ॥ न तु प्रज्वलिते वन्हौ ॥ तथा भविष्यद्रोगारंभकदोषस्थ
दोषैकमात्रं व्यक्तं विशिष्टं प्राग्रूपं ज्ञात्वा भावि ॥ व्याधेरुपशमः कर्तुं पार्यत इति
॥ अलक्तकपूर्वरूपरूपयोर्भेद एव स्यात् ॥ तद्यथा ॥ कश्चित् शारीरं दृश्यते ॥ कश्चि
न्मानसं चलत्वशारीरं ॥ ज्वरस्यालस्यं वैरस्यं गात्रगौरवादिकमित्यादि ॥ मानसं
यथा ॥ अरतिर्हितोपदेशेष्वक्षांतिः इत्यादि ॥ ६ ॥ ॥ ॥ तदेव व्यक्ततां याता
तं रूपमित्यभिधीयते ॥ संस्थानं व्यंजनं लिंगं लक्षणं चिन्हमाकृति ॥ ७ ॥ ॥ ॥५॥
अथ रूपं लक्षयितुमाह ॥ तदेव प्राग्रूपं व्यक्ततां यातं सत् रूपमिति कथ्य

ते ॥ अनिर्धारितएकत्वाऽनेकत्वविशेषस्य पूर्वरूपमात्रस्य व्यक्तस्य व्याधिलिंगत्वं ॥ य
था तृणपर्णादिविशेषविरहे धूममात्रस्य वन्हिबोधकत्वमिति ॥ संस्थानमित्यादि ॥
संस्थानादिमूर्तता: ॥ षट् रूपस्य पर्यायवाचका: शब्द: ॥ तथा पूर्वरूपस्यापि पूर्व
संस्थानं पूर्वव्यंजनं एवंप्रकारेणावक्तव्यमित्यपरे ॥ ७ ॥ ॥ ६ ॥ रूपं स्वभावे
सौंदर्ये आकारश्लोकयोरपीति मेदिनीकोशे ॥ आकार: आकृति: ॥ तदुक्तं ॥
आकाराविंगिताद्कृतिरिति ॥ द्वितीय ॥ उत्पन्नव्याधिबोधकमेवलिंगं रूप
मिति लक्षणं ॥ उत्पन्नएवं पूर्वरूपव्यवच्छेदार्थं ॥ एवकारेण निदानसंप्रा
प्त्युपशयी ॥ व्यवच्छिद्यंते ॥ तेषामुत्पन्नानुत्पन्नव्याधिबोधकत्वात् ॥ ६ ॥
॥ इति षष्ठश्लोकस्य रूपशब्दस्य पर्याया: ॥ ६ ॥ हेतुव्याधिविपर्यस्ताविप
र्यस्तार्थकारिणं ॥ औषधान्नविहाराणामुपयोगं सुखावहं ॥ ८ ॥ ॥ ॥

॥६॥

अथोपशयलक्षणमाह॥ उपभुज्यत इति उपयोगः॥ सुखं अयं वहति सम्यगनुबंधेन सु
खमुत्पादयतीति सुखावहः॥ एतेन सुहृद्वच्छान्वितस्य न वज्ज्वरिणः॥ इति तत्पानाच्च
सुखकरमिति नोपशय इति तात्पर्यार्थः॥ उपयोगं सुखावहं सुखकरं वि उपशयं वि
द्यात्॥ केषामुपयोगः॥ औषधान्नविहाराणां॥ ओषधं हरीतक्यादि क्वाथादि॥ अन्नं र
क्तशाल्यादि॥ विहारो वाग्देहमनोनिर्वर्तितश्चेष्टाविशेषः॥ व्यायामजागरणाऽध्य
यनादिरूपः॥ औषधं च अन्नं च विहारश्च औषधान्नविहारास्तेषां॥ किंभूतानां॥ हे
तुव्याधिविपर्यस्तविपर्यस्तार्थकारिणां॥ हेतुश्च व्याधिश्च हेतुव्याधी तयोः व्यस्तस
मस्तयोः विपर्यस्ता निदानरोगयोः विपरीताः तथा विपर्यस्तानामार्थो विपर्य
स्तार्थः स्तयोरेव व्यस्तसमस्तयोर्विपरीतार्थं कुर्वंतीति विपर्यस्तार्थकारिणः॥ ६॥
हेतुव्याधिविपर्यस्ताश्च विपर्यस्तार्थकारिणश्च हेतुव्याधिविपर्यस्ताविपर्यस्ता

त

र्थकारिणः॥ तेषां केषां॥ विपर्यस्तानामर्थकुर्वतीतिप्रकृतत्वात् हेतुव्याधिविपर्यस्तानां तदायमर्थः॥ निदानरोगयोः व्यस्तसमस्तयोर्विपरीता अपकाररूपाद्ववशास्समा नः व्याधिरूपाद्ववशास्समानाः॥ हेतुव्याधिविपरीतानां व्याध्युपशमलक्षणं कुर्वतीति॥ यथा हेतुविपरीतैरौषधान्नविहारैर्व्याध्युपशमः क्रियते॥ प्रलिप क्षोदेवं विपर्यस्तार्थकारित्वमपित्यर्थः॥ अथ हेतुविपरीतानां व्याधिविपरीतानां हेतुविपरीतार्थकारिणां व्याधिविपरीतार्थकारिणां हेतुव्याधिविपरीतार्थकारिणां हेतुव्याधिविपरीतार्थकारिणां औषधान्नविहाराणां यः सुखावहः उपयोगः॥ स उपशाय इति पिंडितार्थः॥८॥ ॥ ॥ विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतं॥ विपरीतोनुपशायो व्याध्यसात्म्यमिति स्मृतं॥९॥ अथ क्रमेणोदाहरणान्याह॥ हेतुविपरीतमौषधं यथा॥ शीतहेतुके कफज्व

॥७॥

रे सुंठ्याद्युष्णं भेषजं॥यदुक्तं॥शीतेनोष्णकृता रोगाः शाम्यंति भिषग्विदः॥ये तु
शीतकृता रोगास्तेषामुष्णं हि भेषजं॥हेतुविपरीतमन्नं यथा॥श्रमानिलज्वरे सौ
दनं हेतुविपरीतो विहारो यथा॥दिवास्वप्नोत्थे कफे रात्रौ जागरणं॥अथ व्याधिविप
रीतमौषधं यथा॥अतिसारे स्तंभनं पाठादि व्याधिविपरीतमन्नं यथा॥अतिसा
रास्तंभनं मसूरादि॥व्याधिविपरीतो विहारो यथा॥उदावर्ते प्रवाहणं॥तल्लक्षणं॥
सन्नाबद्धहृत्कंठबलेन वायोरूर्ध्वाधोगमनं प्रवाहणं॥तथा मंत्रौषधीधारणबल्यु
पहारनियमप्रायश्चित्ताचरणहोमदेवगुरुशुश्रूषाद्यो व्याधिविपरीताः वि
हाराः॥अथ हेतुव्याधिविपरीतमौषधं यथा॥वातशोथे दशमूलं वातहरं शोथ
हरं च॥हेतुव्याधिविपरीतमन्नं यथा॥वातकफग्रहण्यां ग्रहणीहरं च॥शीतवा
तोत्थे वातज्वरे पेयसा उष्णवीर्यत्वाद्वातं हंति प्रभावात् ज्वरं च॥तथा तक्रं के॥
ज्वरे चैवातिसारे च यवागूः सर्वदा हिता॥हेतुव्याधिविपरीतो विहारो यथा॥

॥७॥

स्निग्धायां दिवास्वप्नजायां तंद्रायां रूक्षं लेंद्रा विपरीलंजागरणमिति ॥ ॥ अथ हेतु
विपरीतार्थकारी औषधं यथा ॥ पच्चप्रधाने पच्यमाने व्रणशोथे पित्तकर उपनो
पनाहः ॥ हेतुवि । परीतार्थकारी अन्नं यथा ॥ पच्चप्रधाने पच्यमाने व्रणशोथे । पि
त्तशोथे अन्नं विदाही ॥ हेतुविपरीतार्थकारी विहारो यथा ॥ ॥ वातोन्मादे त्रासनमि
ति ॥ अथ व्याधिविपरीतार्थकारि औषधं यथा ॥ कफच्छर्द्यां वमनकर मदनफ
लादि ॥ व्याधिविपरीतार्थकारि अन्नं यथा ॥ अतिसारे विकरे कृतक्षीरं ॥ व्याधि
विपरीतार्थकारी विहारो यथा ॥ छर्द्यां अंगुष्ठादि फलेनादि वमनं ॥ वमनविकारा
भ्यां छर्द्यतिसार वाहिरे वकलंयुक्ता ॥ द्वरु उपशमनकरणोत विपरीतार्थकारित्वं
अथ हेतुव्याधिविपरीतार्थकारी औषधं यथा ॥ अग्निप्लुष्टे उष्णमोगवादिलेपः ॥
विषे वा विषं ॥ हेतुव्याधिविपरीतार्थकारी अन्नं यथा ॥ मद्यपानोत्थे मदात्य
ये मद्यकारकं मद्यं ॥ हेतुव्याधिविपरीतार्थकारी विहारो यथा ॥ व्यायामजनिते

।।८।।

मूढगर्भे जलप्रतरणरूपो व्यायाम इति ।। एवमपरेऽपि बोधव्याः ।। औषधान्नविहाराणा
मित्युपलक्षणं ।। तेन देशकालावपि बोधव्यौ ।। हि शब्दः पादपूरणे ।। स उपशयो व्याधे
रामयस्य सात्म्यमिति स्मृतः ।। एवंविधः गुणविपरीतो यथा ।। आहारो विहारश्च ।।
प्रायेण सर्वव्याध्यसात्म्यः ।। उक्तं चरके ।। देशानामामयानां च विपरीतगुणं गुणैः ।। सात्म्यमिच्छ
ति सात्म्यज्ञाश्चेष्टितं चाद्यमेव च ।। उपशयकथनप्रस्तावात् ।। अनुपशयोऽपि वाच्य इत्याह ।।
विपरीत इत्यादि ।। अतो यथा निर्दिष्टलक्षणादुपशयाख्याद्यो विपरीतलक्षणः ।। औषधान्न
विहाराणां अनुपयोगः ।। असुखावहः ।। स अनुपशय इत्युच्यते ।। स एव व्याधेरसात्म्यमि
ति संज्ञितः ।। अनिसुखेनसंकीर्तित इति ।। ९ ।। ।। ६२ ।। यथा दुष्टेन दोषेण यथा चानुवि
सर्पता ।। निवृत्तिरामयस्यासौ संप्राप्तिर्जातिरागतिः ।। १० ।। संख्याविशेष प्राधान्यबलकाल
विशेषतः ।। सा भिद्यते यथात्रैव वक्ष्यन्तेऽष्टौ ज्वरा इति ।। ११ ।। ।। अथ संप्राप्तेर्लक्षणमा
ह ।। येन प्रकारेण दुष्टः प्रकुपितो वाताद्यन्यतमो दोषो ।। यथा दुष्टेनेत्यनयथा दुष्टेन ।। दो
षेण ।। यथा चानुविसर्पता देहमनुधावता सन्निवेशविशेषेण गच्छता प्रसारमयं निवृत्ति
रित्युत्पत्तिर्निर्दिष्टा सा संप्राप्तिः ।। सच जातिरागतिश्च कथ्यते ।। पर्यायशब्दत्वेन व्या

।।८।।

धिजन्मसंप्राप्तिरित्येके॥ सा ज्वरस्य मलमूत्रेत्यादिलक्षणलक्षिता॥ तत्र मलानामामाशयमनुवेश्या
नेन॥ तथा च स्रोतोनिरोधेन॥ तथा च पक्तिस्थानात् ज्वलननिरसनेन॥ तथा च तेन वृजाद्रसस्यैव
न्हिन॥ तथा निःसरणेन॥ तथा च सकलगात्रं आयुष्टं कुर्वता॥ एवंविधया संप्राप्त्या ज्वरोऽयमिति नि
श्रीयते॥ एवमतिसारादिष्वपि चिंत्या संप्राप्तिः॥६२॥ ॥अथ संप्राप्तिभेदानाह॥ सा च संप्राप्तिः
संख्याविशेषेणाभिद्यते॥ संख्या च विकल्पश्च प्राधान्यं च बलं च कालश्च तान्येवं तेषां विशेषतः॥ त
स्मात् संप्राप्तिर्बहुधाभिधीयते॥ तत्र संख्याविशेषा यथा॥ इहैवास्मिन् ग्रंथे संवक्ष्यते॥ अष्टौ ज्व क्ष्य
रा इति॥ एवमपि पंचकासा इति॥ पंच गुल्मा इत्यादि॥ एवमादयः संख्याविशेषाः संप्राप्तिभेदाः॥५५॥
॥ ॥६०॥ दोषाणां समवेतानां विकल्पोंऽशांशकल्पना॥ स्वातंत्र्यपारतंत्र्याभ्यां व्याधेः प्राधान्यमा १२
दिशेत्॥ ॥अथ संख्यानंतरं विकल्पं विवृणोति॥ दोषाणां वातादीनां एकस्मिन् व्याधौ संघटितानां
अंशांशभागेन कार्यानुमेयेन निरूपणमस्य विकल्पः अंशश्च अंशांशश्च अंशांशौ ताभ्यां कल्पना॥ अ
नेकविधो दोषो वातादिगतात् रौक्ष्यादिकः॥ यथा किमयं वातः सर्वैर्गुणैः कुपितः॥ किं त्रिभिः [illegible]
किं द्वाभ्यां किमेकेन इत्यादि॥ कल्पना॥ तद्यथा॥ वायोः रौक्ष्यलाघववैशद्यशैत्यादिगुणस्य॥
एवं गुणः॥ कषायो रसः कलायश्च वसर्जेरंशो वर्धकः॥ रौक्ष्यशीतलाघवैस्त्रिभिरंशैः तुल्यकंशा

॥१९॥

कं॥ रौक्ष्यशैत्याभ्यां कांडेक्षुः॥ रौक्ष्ये एकेन गुणेन सीधुः। तथा सर्वैः अंशैः कट्वम्लतीक्ष्णोष्णैः पि
त्तस्य। कटुकोरसो मद्यं च। कटूष्णतीक्ष्णैः हिंगु। दीप्यतीक्ष्णोष्णाभ्यां। उष्णेनैकेन तिलाः। एवं स
र्वैरंशैः। श्लेष्मणो मधुरो रसो माहिषं पयश्च। स्नेहगौरवमाधुर्यैः राजादनफलं। कसेरुः शैत्यगौरवा
भ्यां। शैत्येनैकेन मृणालं। एवमपरे विज्ञेयाः। दोषाणां बहुत्वेपि पृथक्कथनं समवेतानामिति
द्वंद्वसन्निपातयोर्ग्रहणं॥ उक्तं हि सुश्रुते॥ सर्वैरंशैस्त्रिभिर्वापि द्वाभ्यामेकेन वा पुनः। संसर्गे कुपि
तः क्रुद्धो दोषं दोषोनुधावति॥ ॥अथ प्राधान्यं विवृणोति॥ स्वातंत्र्यं च पारतंत्र्यं च ताभ्यां प्रा
धान्यमाधेरादिशेत्॥ अप्राधान्यं चेति शेषः॥ तत्र स्वतंत्रस्य व्याधेः स्वनिर्दिष्टोपक्रमसा
ध्यत्वात्प्राधान्यं यथा ज्वरस्य॥१२॥ ॥१३॥ हेत्वादि कार्त्स्न्यावयवैर्बलाबलविशे
षणं॥ नक्तंदिनर्तुभुक्तांशैर्व्याधिकालीयथामलं॥१३॥ अथ बलाबलं विवृणोति॥ हेतुपूर्वरू
परूपाणां कार्त्स्न्याद्व्याधेर्बलं तेषामवयवत्वेन एकदेशेनाबलत्वं॥ कृत्स्नस्य भावः कार्त्स्न्यं का
र्त्स्न्यं च अवयवाश्च कार्त्स्न्यावयवाः॥ बलं च अबलं च बलाबले व्याधिसंबंधिनी तयोर्विशेषणं॥ शो

१३ ॥१९॥

विशिष्टताबलाबलविशेषणं॥ तद्यथासंरंभेन कालस्यावयवे रात्रिशेतृ॥ आदित्यग्रहात्मकपाद
योरहंते॥ तेषांतस्मात्व्याधेर्बलत्वं॥ तेषामवयवेकदेशेनाबलत्वं॥ तत्रप्रतिरोगंयन्निदा
नमुद्दिष्टं तत्कात्स्न्येनास्यव्याधेरुत्पादिकं॥ उतैकदेशेन॥ एवंप्राय्रूपमपिकिंसमस्तस्यव्याधे
र्लक्ष्यते॥ उतावयवेकेन उपन्नस्योप्यस्यव्याधेस्तर्पणरूपः॥ सकिंकात्स्न्येनसुखानुबंधकरो
ति॥ उताऽवयवेन॥ तत्रकात्स्न्येनयथा॥ रक्तशाल्यादि॥ मांसघृतक्षीरदधिवसामज्जातैलादि
नां॥ अवयवेनयथा॥ रक्तशालिनामांसंमद्यान्नमेकेनवा॥ एवमन्यदपिज्ञेयः॥ ॥कालंवि
वृणोति॥ नक्तंरात्रिः दिनंआहः॥ ऋतवोवसंतादयः॥ भुक्तंआहारः॥ एषामंशेरादिमध्यांतल
क्षणेरेकदेशैर्वानेयंथामलंयथा॥ दोषंव्याधेःकालोव्याधिवृद्धिहानिहेतुकाश्च लः॥ यथारा
त्रिमुखश्लेष्मा। मध्येपित्तं। शेषवायुः॥ एवंदिनस्यापिपूर्वान्हेश्लेष्मा। मध्यान्हेपित्तं। अपरान्हे
वायुः॥ एवंऋतुरू॥ वसंतेश्लेष्मा। शरदिपित्तं। वर्षासुवायोःकोपः॥ एवंभुक्तमात्रेकैकस्यम
ध्येपच्यमानावस्थायांपित्तस्यसम्यक्परिणतौ वायोःकोपः॥ अत्रसंवत्सररूपस्यका

॥२०॥

स्प

लस्यऋतुऋतोरूत्वंत्राइतियोऽन्यः॥ नतुएकस्यरतोर्दिनादिवल॥ केचनऋत्वंत्राकतिपयाहोरा
त्राणिकथयंति॥ यदुक्तंच॥ रक्तदृ॥ ऋलोरंत्यौसादिसप्ताहऋतुसंधिरितिस्मृतः॥१३॥ ॥
॥ इतिप्रोक्तोनिदानार्थसव्यासेनोपदेक्षते॥ सर्वेषामेवरोगाणांनिदानंकुपितानलाः
॥१४॥ तत्प्रकोपस्यतुप्रोक्तंविविधाहितसेवनं॥ निदानार्थकरोरोगोरोगस्याप्युपजायते
॥१५॥ अथउक्तनिदानपंचकमुपसंहरति॥ इतिशब्दः समाप्तौ॥ अनेनसंक्षेपाख्येनप्रकारे
ण॥ यथानिर्दिष्टनिदानार्थोनिदानाभिधेयः समासतः॥ संक्षेपतः कथितः॥ निदानशब्दोऽत्र
सामान्यंप्राग्रूपादिषु॥ यएवनिदानार्थः॥ समासेनप्रोक्तस्तमेवव्यासेनविस्तरेणोपदेक्ष्यते॥
कथंइष्यते॥ सकलेनग्रंथेनप्रतिरोगंनिदानपूर्वरूपरूपादयएवविशेषैर्वक्ष्यादस्यर्थः॥
संनिकृष्टकारणत्वेनवातादीनासर्वरोगेषुव्यभिचारितकारणत्वमाह॥ चरकेप्युक्तं॥
नास्तिरोगोविनादोषैर्यस्मात्तस्माद्विचक्षणः॥ अनुक्तमपिदोषाणांलिंगैर्व्याधिमुपा
चरेत्॥ आगंतुव्याधिषु यद्यप्यु त्पत्तौदोषकोपोनास्ति॥ तथाप्युत्पत्त्यनंतरं अवश्यंभावी॥

॥२०॥

स्प

कुपितत्वेन हि धातूनां मलिनीकरणाद्दोषा एव मला इत्युच्यंते ॥ कुपिता विकृतिमापन्ना
वातपित्तकफाः ॥ सर्वेषामेव रोगाणां निदानं कारणं ॥ तत्प्रकोपस्येति ॥ तदित्यनेन वा
तादयः ॥ परामृश्यंते ॥ तस्य तु वातादिप्रकोपस्य निदानं कारणं विविधं नानाप्रकारमहि
तासेवनं ॥ अहितानुष्ठानं प्रोक्तं कथितमिति ॥ ननु किमेतदेव निदानं ॥ अन्यदप्यस्तीत्य
त आह ॥ रोगस्य व्याधेः रोगोऽपि निदानार्थकर उपजायते ॥ निदाने योऽर्थः क्रियते व्याधि
रव्याः स रोगो रोगान्तरस्यापि निदानार्थः ॥ १५ ॥ ६४ ॥ तैरेव दर्शयति ॥ ॥ तद्यथा ज्वरसंतापाद्रक्तपित्तमुदी
र्यते ॥ रक्तपित्ताज्ज्वरस्ताभ्यां श्वासश्चाप्युपजायते ॥ १६ ॥ प्लीहाभिवृद्ध्या जठरं जठराच्च शो
फ एव च ॥ अर्शोभ्यो जाठरं दुःखं गुल्मश्चाप्युपजायते ॥ १७ ॥ प्रतिश्यायाद्यथा कासः का
सात्संजायते क्षयः ॥ क्षयो रोगस्य हेतुत्वे शोषस्याप्युपजायते ॥ १८ ॥ ते पूर्वं केवला रो
गाः पश्चाद्धेत्वर्थकारिणः ॥ कश्चिद्धि रोगो रोगस्य हेतुर्भूत्वा प्रशाम्यति ॥ १९ ॥ ॥ तदेव दर्श
तमाह ॥ तद्यथेति ॥ कारणभूतात् ज्वरसंतापात् रक्तपित्तं उदीर्यते ॥ उत्पद्यते ॥ कार

॥११॥

एतस्मात् रक्तपित्तात्॥ ज्वरः समुपजायते॥ ताभ्यां रक्तपित्तज्वराभ्यां श्वासः उपजायते॥ प्ली
हाभिवृध्या जठरमुदरविकारः॥ तस्माज्जाठरात् शोकः॥ अर्शोभ्यएव जाठरं॥ गुल्मश्चाप्युप
जायते॥ दुःखमिति॥ दुःखं पीडाकरं॥ दुःखशब्दो लिंगपरिणामेन सर्वं चैव ज्वरादिषु यो
ज्यः॥१७॥ अथ प्रतिश्यायात्कासो जायते कासात् क्षयः संजायते॥ ओजः शुक्रलिनां
इति शोषः॥ रोगस्य हेतुत्वे उपजायते॥ ॥कस्य रोगस्येत्याह॥ शोषस्येति॥ ते व्याधयः
प्राक् केवलाः स्वतंत्राः संतः रोगाएव रुजः करत्वात्॥ पश्चात् उपद्रवहकहेतुलात्
त्॥ हेतोर्निदानस्य योऽर्थः प्रत्ययो जनं व्याधिजननाख्यं तत् कुर्वंति॥ यथा ज्वरो र
क्तपित्तमिति॥१९॥ ॥१९॥ न प्रशाम्यति चाप्यन्यो हेत्वर्थं कुरुतेपि च॥ एवं कृच्छ्रतमा नृ
णां दृश्यंते व्याधिसंकराः॥२०॥ तस्माद्यत्नेन सद्वैद्यैरिच्छद्भिः सिद्धिमुत्तमां॥ ज्ञातव्योव
क्ष्यते योयं ज्वरादीनां विनिश्चयः॥२१॥ तस्यैव रोगजनकव्याधेर्वैचित्र्यमाह॥ एवमु

॥११॥

क्तप्रकारेण व्याधिसंकराः व्याधिमेलकाः कृच्छ्रतमा दृश्यंते॥ कथं॥ कश्चित् रोगः रो

गांतरस्य कारणभूत्वा प्रशाम्यति ॥ अन्यश्च न प्रशाम्यति ॥ यथा प्रतिश्यायो न निवर्तते ॥
कासश्चोपपद्यते ॥ अतो न निवर्तते ॥ जठरगुल्मोस्यातां ॥ कृछ्रतमत्वं चैषां रोगाणां ब
हुविधं विदुः ॥ व्याधिदुःखजनकत्वात् ॥ प्रायो विरोधोपक्रमत्वाच्च ॥ २० ॥ ॥ अथ उक्त
निदानपंचकस्य रोगनिवृत्तिलक्षणसिध्यादिहेतुत्वेनाऽवश्यं ज्ञातव्यं तमाह ॥ तस्मात् का
रणात् ॥ उद्धृतां बहुविधविज्ञायत्वेन महतीं सिद्धिं इच्छद्भिः वैद्यैः येयं ज्वरादीनां विनि
श्चयो वक्ष्यते ॥ स यत्नेन ज्ञातव्यः ॥ ॥ इति वैवाचस्पतिकृते अतंकदर्पणे निदानटी
कायां सर्वरोगनिदानादि पंचकथनं ॥ ६१ ॥ ६२ ॥ ६३ ॥ निदानमिति ॥ अथ वक्ष्यमाणेषु वि
कारेषु प्रकृतिसमसम वायविकृतिविषमसमवायादिज्ञानार्थं स्वरकोत्ता[?] ॥ वातादि
गुणानलिख्यते ॥ रूक्षः शीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः ॥ विपरीतगुणैर्द्रव्यैर्मारु
तः संप्रशाम्यति ॥ ॥ सस्नेहमुष्णं तीक्ष्णं च द्रवमम्लं सरं कटु ॥ विपरीतगुणैः पित्तं
द्रव्यैराशु प्रशाम्यति ॥ ॥ गुरुस्निग्धमथाम्लं श्लक्ष्णं मधुरस्थिरपिच्छलाः ॥ श्लेष्मणः प्र

द्रामं यांति विपरीतगुणैर्गुणाः ॥ १ ॥ ४५ ॥ ४८ ॥ ॥ अथ सर्वरोगप्राधान्यात्प्रथमं ज्वरो वाच्यः ॥
॥१२॥ प्राधान्यं चास्य शारीररोगेषु प्रथमोत्पन्नत्वात् ॥ ... त्वाद्देहेंद्रियमनस्तापित्वाच्च ॥
जन्मनिधनयोः अवश्यंभावित्वाच्च ॥ स्थावरजंगमरूपसर्वभूततापित्वाच्च ॥ नैवमन्ये विकाराः ॥ उक्तं चरके ॥ देहेंद्रियमनस्तापी सर्वरोगाग्रजो बली ॥ ज्वरः प्रधानो रोगाणामुक्तो भगवता पुरा ॥ तद्यथा ॥ ज्वरेण विप्रमुक्तानां भूतं नहि किंचिन्न तप्यते ॥ उक्तं च गजायुर्वेदे ॥ पालकाप्यः ॥ स तु नागानामभितापः स्मृतो वाजिनां ॥ गवामीश्वरसंज्ञश्च मानवानां ज्वरो मतः ॥ अजाविनां मल्लापाख्यः करभे चालसो भवेत् ॥ हरिद्रोम हरिणानां तु मृगरोगो मृगेषु च ॥ पक्षिणामभिघातः स्यान्मत्स्येष्विंद्रमदो मतः ॥ पक्षाघातः पतंगानां व्याले हंधकसंज्ञकः ॥ अन्यत्रापि ॥ जलस्य नीलिका ... नेरूषरो वृक्षस्य कोटरः ॥ इत्यादि ॥ ॥ तस्य प्रागुत्पत्तिमाह ॥ दक्षापमानेन दक्षमखक्रतु परिभवेन क्रुद्धस्य रुद्रस्य ॥ निश्वासात्संभवो ज्वरस्य तथा ॥ निश्वासोत्र क्रोधादिलिंगत्वेन निर्दिष्टः ॥ अथ सुश्रुते ॥ रुद्रकोपाग्निसंभूतः सर्वभूतप्रतापन इति ॥ क्रुद्धेन रुद्रेण ॥१२॥

ललाटेतृतीयकमाग्नेयंचक्षुः स्रष्टाललोप्यास्मिन्नेयोबाणेविनिर्मितः॥ उक्तंचरके॥ स्रष्टा
ललाटेचक्षुर्वेधाध्यायेत्नान्सुरान्प्रभुः॥ बाणं क्रोधा[illegible]भिसंतप्तमसृजं[illegible]ननाशनमिति॥
एतावदाक्रोधोन्द्रवत्वेनतस्यतेजसत्वंप्रकाशयते॥ यथा[illegible]चरके॥ क्रोधाग्नेरितिमिति॥ तेन
सर्वज्वरेपित्तिन्भाऽविरोधिनीक्रियाकार्येतिसिद्धमिति॥ यथा[illegible]वाग्भटे॥ ऊष्मापित्ताहृ
तेनास्तिज्वरोनास्त्यूष्मणाविना॥ ॥ दक्षापमानसंक्रुद्धरुद्रनिश्वाससंभवः॥ ज्वरोष्टधा
पृथग्द्वंद्वसंघाताऽगंतुजस्मृतः॥२२॥ तस्मात्पित्तविरुद्धानिल्यजेत्पित्ताधिकेधि
कमिति॥ कटुतिक्तकषायरसान्परित्यज्यतरुणज्वरेपाचनत्वेनातकोरसः पित्तघ्नत्वेनानि
र्दिष्टः॥ यथाह॥ लंघनंस्वेदनंकालेयवागूस्तिक्तकोरसः॥ पाचनान्यविपक्वानांदोषाणांतरु
णज्वरे॥ अन्येत्वाहुः॥ रुद्रसंभवत्वेनदेवतात्मकत्वात्पूजाद्युपदिष्टमिति॥ यथाहवि
देहः॥ ज्वरस्तपूजनेनापिसहसैवोपशाम्यति॥ उक्तंचहरिवंशे॥ ज्वरस्त्रिपादस्त्रिशिरा
षड्भुजोनवलोचनः॥ भस्मप्रहरणोरौद्रःकालांतकयमोपमः॥ इतिज्वरलिंगमाहुः॥ बहुवि
धमपिज्वरंसंक्षेपेणाह॥ ज्वरोष्टधेतिपृथक्त्रिविधोणाति॥ वातिकः॥ पैत्तिकः॥ श्लैष्मिकः॥

नि २२

द्वंद्वजास्त्रयोप्येवं॥ संघातिकः सन्निपातिक एकः॥ आगंतुज एकः॥ एवमष्टौ ज्वरा इति॥

॥१३॥ बोधव्यं॥२२॥ ॥अथ ज्वरस्य संप्राप्तिमाह॥ कोष्ठाग्नेः ऊष्माचोपलभ्यते॥ अकाले चातिमा

त्रं च असात्म्यं चापि भोजनं॥ विषमासनं च यत् प्रोक्तं मिथ्याहारः स उच्यते॥ ॥मिथ्याहारो

देशकालप्रकृत्यादिविरुद्धः॥ संयोगादिविरुद्धः क्षीरमत्स्यादिरिव॥ अत्र शक्तः कु

रुते कर्म शक्तिमात्र करोति यः॥ मिथ्याविहार इत्युक्तः सदा चैव तु वर्जयेत्॥ मिथ्याविहारः

अयथाबलमारंभः॥ इदृशस्य पुरुषस्य आमाशयाश्रयाः दोषा वातपित्तश्लेष्माणः

कोष्ठाग्निं बहिर्निरस्य ज्वरकारिणो भवेयुः॥ उक्तं चरके॥ नाग्निस्तं नांतरं जंतोरामाशय

गतिस्थलः॥ किं विनिर्दोषाः रसानुगाः॥ रसबंधाः अवश्यं रसं दूषयित्वा ज्वरोत्पादका इ ॥१३॥

ति॥ कोष्ठाग्निमिति शब्दोऽग्निनिरासार्थं॥ एषां च संप्राप्तिः॥ शारीराणामेव न त्वागंतुकाना दे

नां॥ तेषां तु ज्वरस्य पूर्व कोपात् ताप्यत्वबंधः॥ उक्तं तु स्मृते॥ यथा प्रनामिधाते भ्यो देहि

नां कुपितोऽनिलः॥ प्रदूष्याखिलं देहं ज्वरमापादयत्यूर्ध्वं॥ एवं चरके प्युक्तं॥ तथाभिघा

तजोवायुः प्रायोरक्तं प्रदूषयन् ॥ सव्यथाशोथवैवर्ण्यं करोति सरुजं ज्वरं ॥ न त्वागंतु
रपि शारीर स्यात् ॥ यथा आगंतुज्वरे उष्मा ऽ उपलभ्यते ॥ ॥ मिथ्याहारविहारा
भ्यां दोषाह्यामाशयाश्रयाः ॥ बहिर्निरस्य कोष्ठाग्निं ज्वरदाः स्यूरसानुगाः ॥२२॥ ॥
उष्मापित्तादृते नास्ति ज्वरो नास्त्यूष्मणा विना ॥ तस्मात्पित्तविरुद्धानि त्यजेत्पित्ताधिकेऽधिकं ॥ [illegible] ॥ आगंतुर्हि व्यथापूर्वो
जायते ॥ पश्चाज्जिजे दोषैरनुबध्यते ॥ उक्तं च ॥ आगंतुरन्वेति निजं विकारं निजस्तथा ॥
गंतुमिति प्रवृद्धः इति ॥२३॥ स्वेदावरोधः संतापः सर्वांगग्रहणं तथा ॥ युगपद्यत्र रोगे च
स ज्वरो व्यपदिश्यते ॥२४॥ अमोरतिविवर्णत्वं वैरस्यं नयनप्लवः ॥ इच्छाद्वेषौ मुहुश्चा
पि शीतवातातपादिषु ॥२५॥ जृंभांगमर्दो गुरुता रोमहर्षोऽरुचिस्तमः ॥ अप्रहर्षश्च शी
तं च भवत्युत्पत्स्यति ज्वरे ॥२६॥ ॥ अथ ज्वरस्य लक्षणमाह ॥ यत्र यस्मिन् रोगे
युगपत् एककाले इदं त्रिलक्षणं स्यात् स ज्वरः कथ्यते ॥ स्वेदावरोधः स्वेदाऽनिर्गमः ॥
अन्ये पैत्तिके स्वेदावगमात् ॥ लक्षणे व्यभिचारः ॥ [illegible]तुरे रात्रिः स्विद्यंते अनेनेति ॥

27

सुत्पसानस्यावरोधो दोषव्यासेः ।। संतापः संज्वरात् ।। देहेंद्रियमनसां संतापं लक्षयति ।। देहेंद्रिय

।।२४।। मनस्तापद्रूत्सारि इंद्रियाणां च वैकृत्यं संतापलक्षणं ।। तथा ।। देहेंद्रियमनस्तापि ग्लानिमनःसंता

पलक्षणमिति ।। संतापो दाहरव्यो रोगः ।। ज्वरप्रत्यात्मिकं लिंगं ।। संतापो देहमानसइति ।। ननु

शारीरे जायते एवं देहे मनसि मानसं ।। सर्वांगग्रहणं सर्वांगवेदना ।। स्वेदावरोधइत्यत्र वे

गावरोधइत्यन्ये पठंति ।। तत्र वेगोपरोधः ।। वातमूत्रपुरीषादीनामनिर्गमः ।। २७ ।। ६९ ।। ६७ ।।

प्रवैकृत्यमाह ।। आलस्यमिकत्रमः ।। अरतिः अनवस्थितचित्तत्वं ।। अरतिः क्रीडामावद्ध

स्पर्शे ।। वैवर्ण्यं म्लानगात्रता ।। वैरस्यं मुखस्याऽविरसता ।। नयनप्लवः अश्रुस्रवणे

नेत्रत्वं ।। शीतवातातपादिषु विषयेषु इच्छा द्वेषो मुहुः अभिलाषविद्वेषौ ।। आदिशब्दा

त् अंबुज्वलनयोर्ग्रहणं ।। उक्तं चरके ।। ज्वलनातपवाय्वंबु भक्ष्यद्वेषावनिश्चितौ ।। ।।२४।।

अन्नेषु रुचौ सोऽकस्मात् जलानलौ गृह्णाति ।। ते तु आदिशब्देन गायनादिकं

मन्यते ।। २९ ।। ७१ ।। जृंभा जृंभणं ।। अंगभंगः अंगमोटनं ।। गुरुता गात्राणां अरुचिः भोज्ये ।।

तमः अंधकारः प्रविशत्येवार्थस्संविति ॥ अप्रहर्षः आनंदभावः ॥ शीतलमिच्छति शीतादौ मुहुरिच्छा चेत्यद्वानि
सिद्धयुक्तमपि शीतवचनं ॥ विशेषेण शीतमा दुर्लावदर्शनार्थं ॥ उत्पत्स्यतिभाविनी ज्वरे ॥ २६ ॥ ८० ॥ ८२ ॥
॥ ॥ सामान्यतो विशेषात्तु जृंभात्यर्थं समीरणात् ॥ पित्तान्नयनयोर्दाहः कफान्नान्नाभिनंदनं ॥ २७ ॥
वेपथुर्विषमो वेगः कंठोष्ठपरिशोषणं ॥ निद्रानाशः क्षवः स्तंभो गात्राणां रौक्ष्यमेव च ॥ २८ ॥ शिरो
हृद्गात्ररुग्वक्त्रवैरस्यं गाढविट्कता ॥ शूलाध्माने जृंभणं च भवंत्यनिलजे ज्वरे ॥ २९ ॥ अत्र तु
बोधवेन सामान्येन पूर्वलक्षणं सुश्रुतोक्तं लिखितं ॥ न तु विशिष्टरूपं तत्पूर्वलक्षणं ॥ तस्मात्पिरि हेवे
लिख्यते ॥ सामान्यत इति ॥ भावि निपूर्वपदेन संबध्यते ॥ भाविनि वातिके ज्वरे ऽत्यर्थं जृंभा ॥ पै
त्तिके नयनयोर्दाहः ॥ कफजे नान्नाभिनंदनमिति ॥ अन्नाभिलाषः ॥ वातपित्तकफानां यथाप्र
वेशहरिसारुणाविकारकर्तृत्वं वायोः प्राधान्यं ॥ अनन्तरं प्राधान्यत्वात्प्रथमं वातज्वरलक्षण
माह ॥ वेपथुः कंपः ॥ विषमो वेगः ज्वरस्य हीनाधिकभावेन वेगः प्रवृत्तिर्वा ॥ तस्यैवे
नाम्येन नियतकालत्वं आरोग्येषु वाघशयनयतत्वं ॥ कंठोष्ठपरिशोषणं सुगमं ॥ निद्रानाशः
शयनाभावः ॥ क्षवः स्तंभः ॥ क्षवः छिक्का ॥ तथा स्तंभोऽनिगमं ॥ केचित्क्षव इति भिन्नं
पदं पठंति ॥ तन्मते क्षवः कासः स्तंभो गात्राणां जाड्यमा इति व्याख्यानयंति ॥ तन्नसुक्तं ॥

अतोवाग्गृह्यते ॥ हार्येरोमांगदंतेषु वेपथुः क्षवथोग्रहः ॥ भ्रमः प्रलापोयजेच्छा विनाशास्त्वनि

॥१५॥ लेज्वरे ॥ चरकनिदानेपि क्षवथुविनिग्रहः ॥ विनिग्रहशब्दस्तु निरोधार्थः ॥ यथांतर्वे

गज्वर लक्षणे दोषवर्चोविनिग्रह इति ॥ रौक्ष्यंगात्राणामेव ॥ चकारात्कृष्णत्व विण्मूत्र

नेत्रत्वंसमुच्चीयते ॥ अन्ये तु रौक्ष्यमित्यत्रश्यामांगमलनेत्रत्वमिति पठंति ॥ गात्र

ग्रहणेन शिरोग्रहणेसिद्धेपुनः तदभिधानं विशेषेण शिरसि वेदनासंदर्शनार्थं ॥

हृदि गात्रेषु रुक्पीडा ॥ वैरस्यं विरसास्यता ॥ गाढविट् दृढा बद्धमलता ॥ शूलाध्मा

नेउदरशूल आध्मानंचवायुना ॥ सवेदनमुदरपूरणत्व मिस्पर्शः ॥ जृंभणं जृंभा वा

तुल्यं ॥ अनिलजेज्वरे एतानि लक्षणानि भवंति ॥ एतानि चप्रकृति समुद्भवानि ॥३९॥

॥४१॥४०॥४२॥ ॥ वेगस्तीक्ष्णोतिसारश्च निद्राल्पत्वं तथावमिः ॥ कंठोष्ठमुखनासा

नांपाकः स्वेदश्च जायते ॥ ४० ॥ प्रलापोवक्त्रकटुता मूर्छादाहो मदस्तृषा ॥ पित्तविण्मूत्रने

त्रत्वं पैत्तिके भ्रम एव च ॥ ४१ ॥ ॥ अथ पैत्तिकज्वरमाह ॥ वेगस्तीक्ष्णः तीव्रवेगः अति ॥१५॥

सार इति पित्तस्य सरत्वेन सद्रवं प्रवृत्तिः ॥ नत्वतीसार एषतस्य ज्वरोपद्रवत्वात् ॥ निद्रा

स्य

लपत्वं स्वल्पनिद्रात्वं॥ वमिश्छर्दिः पित्तस्य कफस्थानगत्वात्॥ कंठोष्ठमुखनासानां पाकः सुगमं॥ स्वेदो घर्मांबुनिर्गमनं॥ प्रायेण सामज्वरे स्वेदनिरोधः॥ सामदोषेण स्रोतसां निरोधात् सर्वेज्व
रेषु घर्मनिरोधः स्यात्॥ अत्र तु पित्तस्य तैक्ष्ण्यात्॥ ज्वरप्रभावाद्वा सन भवति॥ प्रला
पोऽसंबंधभाषणं॥ वक्त्रकटुता मुखतिक्तत्वं॥ कटुकंनाम तिक्ताभिधाने॥ कटु स्यात्कटुतिक्तयो
रिति॥ अन्येपि॥ कट्वम्ल मुष्णं विरसं च पूति पित्तेन विद्यात् लवणं च वक्त्रमिति॥ उक्तं
सुश्रुते॥ यो हृत्कंठभ्रंशं वा कटुतिक्तवक्त्रः पीतं सरक्तं हरितं वमेद्वा॥ सवाष्प चोषभ्रमवक्त्र
शोषं सपित्तकोपप्रभवा हि छर्दिः॥ मूर्छा कृपाद्यविज्ञानं॥ तमः प्रवेशो विस्मृतिरित्याहुः॥
मदः मदोन्मत्तता॥ यथाप्रागदुष्टकोद्रवधत्तूरभक्षणाद्भ्रमइति॥ भ्रमश्चक्रस्थितस्येव
संभ्रमात् वस्तुदर्शनमाहुः॥ अन्येतु स्वदेहभ्रमणं॥ ननु भ्रमस्य आशीतिर्वातविका
रपठितस्य वातात्मजत्वात्॥ कथमत्र तु॥ पित्तविकारे पाठः॥ उच्यते॥ नरोगोप्येक
दोषज इति वचनात्॥ अथवा दोषदुष्टसंदर्शनसंभावात्॥ यदुक्तं सुश्रुते॥ रजः
पित्तानिलाद्भ्रम इति॥ अपरे तु पित्तदूषितनेत्रत्वेन विपर्यस्तज्ञानं भ्रमः पीतः रक्तस्य

(31)

तपादिवत्॥ तषापीतविण्मूत्रत्वंसुगमं॥ पैत्तिकज्वरे एतानिलक्षणानिभवंति॥ ४॥ ४॥

॥१६॥ ॐ स्तैमित्यंस्तिमितो वेगआलस्यंमधुरास्यता॥ शुक्लमूत्रपुरीषत्वंस्तंभतृप्तिरथापि च॥ ३२॥ ३२
गौरवंशीतमुत्क्लेदोरोमहर्षोऽतिनिद्रता॥ प्रतिश्यायोऽरुचिःकासकफजेऽक्ष्णोश्चशुक्लता॥ ३२॥ ३२
अथश्लैष्मिकज्वरमाह॥ स्तैमित्यंअंगानांआर्द्रवस्त्राऽवगुंठितमिव॥ स्तिमितो वेगः मंदवेगः॥ आलस्यं॥ तल्लक्षणं॥ यत्रालस्याऽप्यनुत्साहःकर्मण्यालस्यमुच्यतइति॥ मधुरास्यतामधुरवक्त्रत्वं॥ मूत्रपुरीषयोःशौक्ल्यं॥ स्तंभोस्तब्धता॥ तृप्तिः तमस्येवाऽन्नाभिलाषः॥ ॥गौरवं॥ गात्राणां॥ शीतंसुगमं॥ उत्क्लेदः उपस्थितवमनत्वमिव॥ अपरेश्लेष्मनिष्ठीवनं॥ रोमहर्षोरोमांचः॥ अतिनिद्रतानिद्राधिक्यं॥ प्रतिश्यायः नासास्रवणं॥ अरुचिः अन्नस्यलब्धस्याप्यभिलाषेऽप्यभ्यवहाराःसामर्थ्यमितिभेदः॥
कासः प्रसिद्धः॥ अक्ष्णोश्चशुक्लता नेत्रयोः॥ शुक्लत्वमिति॥ कफजेज्वरेएतानिलक्षणानिभवंति॥ केचिदत्रविशेषंकथयंतीत्याह॥ स्रोतोरोधोरुगल्पत्वंप्रसेकोलवणता॥ नात्यकष्टगात्रताछर्दिर्लालास्रावोविपाकता॥ लवणास्यतेत्यत्र बहु ॥१६॥

मूर्च्छेति पाठः ॥ लालास्रावइत्यत्र अंगसाद इति ॥ ॥ १५॥१५॥ तृष्णा मूर्च्छा भ्रमो दाहः स्वप्न
नाशः शिरोरुजा ॥ कंठास्यशोषो वमथु रोमहर्षोऽरुचिस्तमः ॥ पर्वभेदश्च जृंभा च वातपि
त्तज्वराकृतिः ॥ ॥ अथ वातपित्तज्वरलक्षणमाह ॥ तृष्णादि पदं सुगमं ॥ कानिचित्प्र
कृतिसमवायारब्धानि भवंति ॥ कंठास्यशोषः कंठशोषो मुखशोषश्च ॥ वमथुः छर्दिर्भेदः ॥
घुमघुमी लिति लोके ॥ रोमहर्षो रोमांचः ॥ अरुचिः प्रसिद्धा ॥ तमोंधकारप्रविष्टस्येवार्थः सं
वित्ति ॥ पर्वभेदः पर्वाणि भिद्यन्त इति ॥ संधिषु वेदनाभेदः ॥ द्वंद्वजेषु सान्निपातिकेषु च का
निचित् लक्षणानि विकृतिविषमसमवायारब्धानि भवंति ॥ दोषाणामेव लक्षणानि दृश्यंते ॥
प्रकृतिसमवायारब्धानि ॥ यथात्रैव वातपित्ते पैत्तिकज्वरे अरुचिरोमहर्षश्च ॥ वक्ष्य
माण वातश्लेष्मके स्वेदः संतापश्च एवं कफपित्तजे अनवस्थितशीततो हेति सति
कास्यत्वं च ॥ एवं सन्निपातजे सास्रकलुषादि नेत्र शिरो लोठनादि प्रकृतिसमेस
मवाययोः प्रकृतिविराम समवाययोश्च अयमर्थः ॥ प्रकृत्या हेतुभूतया समः का
रणानुरूपः समवायः कार्यकारणभाव संबंधः ॥ प्रकृतिसमसमवायः कारणानु

रूपं कार्यमित्यर्थः॥ यथा शुक्लत्वं तु समवायारब्धस्य शुक्लत्वं पटस्य॥ विकृतिहेतुसमवाय

॥१८॥ विषमः कारणानुरूपः समवायो विकृतिविषमसमवायः॥ यथा हरिद्राचूर्णसंयोग
जं लौहित्यं इति॥ यथा वातपित्तयोर्लक्षणेषु अरुचिरोमहर्षौ न तु विकृत्यारब्धौ द
श्यते॥ वातश्लेष्मणोर्लक्षणेषु संतापो नास्ति॥ सन्निपातादिज्वरलक्षणे दृश्यते॥
सोपि प्रकृत्यारब्धः शिरःलोठनं वातपित्तश्लेष्मणां लक्षणे दृश्यते॥ एवं द्वंद्वजसं
निपातेषु सर्वेष्वपि रोगेषु बोध्यं॥ ८४॥ ॥ स्तैमित्यं पर्वणां भेदो निद्रा
गौरवमेव च॥ शिरोग्रहः प्रतिश्यायः कासः स्वेदाप्रवर्तनं॥ संतापो मध्यवेगश्च वातश्ले
ष्मज्वराकृतिः॥ ३६॥ लिप्ततिक्तास्यता तंद्रा मोहः कासोरुचिस्तृषा॥ मुहुर्दाहो मुहुः ३६
शीतं श्लेष्मपित्तज्वराकृतिः॥ ३७॥ अथ वातश्लेष्मज्वरलक्षणमाह॥ स्तैमित्यं गात्रा ३७
र्द्रवस्त्रावगुंठितमिव॥ अन्ये निश्चलत्वं ज्वरितस्य॥ पर्वणां भेदः वेदना विशेषः सं
धिषु॥ निद्रा प्रसिद्धा॥ गौरवं गुरुत्वमंगानां॥ शिरोग्रहः शिरो गृहीतमिव मन्यते॥ ॥१८॥
प्रतिश्यायो नासास्रावः॥ कासः प्रसिद्धः॥ स्वेदाप्रवर्तनं स्वेदस्यासमंतात्कारेण प्र

वर्त्तनं ॥ मृदुकं हरिति ॥ शिरोग्रहः स्वेदभवश्च कासो ज्वरस्य लिंगं कफवातजस्येति ॥ स्वेद
भवः स्वेदोत्पत्तिरिति ॥ इदमपि लक्षणं विकृतिसमसमवायारब्धं ॥ संतापो विकृतिस
मसमवायारब्धः ॥ मध्यमवेगः नातितीक्ष्णो नातिमृदुः इति ॥ ३६ ॥ अथ श्लेष्मपित्तज्व
रलक्षणमाह ॥ श्लेष्मलालिप्तं पित्तेन तिक्तं मुखं यस्य तस्य भावो लिप्ततिक्तास्यता ॥
तंद्रा निद्राविशेषः ॥ मोहो मूर्छा ॥ मुहुर्दाहो मुहुः शीतमिति वारं वारं प्रतिक्षणेन
सन्निपातल· दाहः शीतं च भवतः ॥ अन्यत्सुगमं ॥ ३७ ॥ क्षणेदाहः क्षणेशीतमस्थिसंधिशिरोरु
जा ॥ सास्रावे कलुषे रक्ते निर्भुग्ने चापि लोचने ॥ ३८ ॥ सस्वनौ सरुजौ कर्णौ कंठः शूकै
रिवावृतः ॥ तंद्रा मोहः प्रलापश्च कासश्वासोऽरुचिर्भ्रमः ॥ ३९ ॥ परिदग्धा खरस्पर्शा
जिह्वा स्रस्तांगता परं ॥ ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च ॥ ४० ॥ शिरसो
लोठनं तृष्णा निद्रानाशो हृदि व्यथा ॥ स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः ॥ ४१ ॥
॥ ॥ अथ सन्निपातज्वरलक्षणमाह ॥ अस्थिसंधिशिरः सुरुजाः शूलं अस्थ्यादि

॥१८॥

पिः संबध्यते ॥ साश्रावे अश्रुयुक्ते ॥ कलुषे रक्ते आविलवर्णे आरक्तवर्णे ॥ निर्भुग्नेलोच
नेविस्फारितनेत्रे ॥ अंतःप्रविष्टे इत्यन्ये ॥ अतिकुटिलइति वक्रः ॥ सस्वनौ सरु
जौ पीडान्वितौ कर्णौ श्रवणे ॥ कंठो धान्याग्रस्त शूककंटकाकारः ॥ अन्ये कपि
कच्छुकेरिव ॥ प्रलापो निबद्धभाषणं ॥ भ्रमश्चक्रारूढेव ॥ अन्येपि विपरीतपदा
र्थज्ञानं ॥ स्यात्तौ पुरुषज्ञानतः ॥ [illegible] ॥ परिदृश्यवत [illegible] वर्णालया खर स्पर्शाक
र्कश्या जिह्वेत्यर्थः ॥ स्रस्तांगतानिःसहावयवता ॥ अन्ये विकलांगत्वमाहुः ॥ ष्ठी
वनं मुखेन रक्तस्य पित्तस्य च ॥ ईषत्कफस्योद्गीरणं ॥ [illegible] ॥ शिरसो लोटनं
दूलस्तलः शिरश्चालनं ॥ निद्रानाशः रात्रौ ॥ स्वेदमूत्रपुरीषाणां चिरेण अल्प
शो दर्शनं चिरात् श्रुतिरिति ॥ अत्र केचित् ५ शेषं पठंति ॥ तद्वच्छीतं महा
निद्रा दिवाजागरणं निद्रेति ॥ तन्न ॥ [illegible] ॥ [illegible] षड्भिः श्लोकेन ॥१८॥
सन्निपातलक्षणं कथितमिति ॥ [illegible] ॥ ॥ ॥ दुराभंनाति [illegible] गात्राणां स

ततं कंठकूजनं ॥ कोठानां श्यावरक्तानां मंडलानां च दर्शनं ॥ ४२ ॥ ॥ सन्निपातज्वरे ऽन्यदपि लक्षणमाह ॥ छन्नत्वं नालिगात्राणां नाति दौर्बल्यं गात्रे दोषपूर्णत्वात् ॥ सततं निरंतरं कंठकूजनं घुर्घुरविशेषशब्दः ॥ कोठानां श्यावरक्तानां कृष्णरक्तवर्णानां मात्रे दर्शनं मंडलानां च तथा ॥ कोठलक्षणं भालुकीतंत्रे पठ्यते ॥ वरटीदष्टसंकाशः कंडुमान् लोहितोऽस्त्रकफपित्तात् ॥ क्षणिकोत्पादविनाशः कोठ इति निगद्यते ॥ इति ॥ ४२ ॥ ॥ मूकत्वं श्रोतसां पाको गुरुत्वमुदरस्य च ॥ चिरात्पाकश्च दोषाणां सन्निपातज्वराकृतिः ॥ ४३ ॥ ॥ मूकत्वं मंदवचनता ॥ अवचनता वा ॥ श्रोतसां पाकः नासाकर्णादीनां पाकः ॥ गुरुत्वमुदरस्य च ॥ उदरगौरवं पूरणता ॥ चिरात्पाकश्च दोषाणां अतिसामपृथक्त्वेन दोषाणां एकत्र मिलितानां चिरकालेन दोषपाकः ॥ चकारादन्यादपि चिन्हानि बोधव्यानीति सूचितं ॥ यथाह वाग्भटः ॥ तद्वच्छीतं महानिद्रा दिवा जागरणं निशि ॥ सदा वा नैव वा निद्रा महास्वेदोऽपि वा न वा ॥ गीतनर्

॥१९॥

र्तनहास्यादिविहृतेहाप्रवर्तनमिति॥ एतल्लक्षणं त्रयोदशसन्निपातेषु मध्ये न सन्नि
नात्॥ वृन्दे दोषैस्त्रिभिः स्मृताबद्धस्य चरकेन पठितमेव॥ एकं द्वि उल्बणोऽयं इत्यादिक्रम
रेण त्रयोदशसन्निपातानां लक्षणं बोधम्॥ ॥तथा च कारुमीरपाठे चरकः॥ भ्रमः पि
पासा दाहश्च गौरवं शिरसोऽतिरुक्॥ वातपित्तोल्बणे विद्याल्लिंगं मंदकफे ज्वरे॥
॥१॥ शैत्यं कासोऽरुचिस्तंद्रा पिपासा दाहरुक्तथा॥ वातश्लेष्मोल्बणे व्याधौ लिंगं
पित्तावरे विदुः॥ छर्दिः शैत्यं मुहुर्दाहो हृदि ध्मानो मोहोऽस्थिवेदना॥ वातोल्ब
णः सन्निपातो यस्य जंतोः प्रकुप्यति॥ तस्य तृष्णा ज्वरो ग्लानिः पार्श्वरुक् दृष्टिसंक्ष
यः॥ पीडिको हृष्टनं दाहरुरुस्यादौबलक्षयः॥ सरक्तं चास्य विण्मूत्रं भृशं निद्राविप
र्यय:॥ निष्पिद्यते गुदं चास्य तस्य वस्तिश्च परिदुष्यति॥ आयम्यते निपीड्यते च
हिक्कते विलपत्यपि॥ मूर्च्छा विस्फायते नौलि नामापि विस्फुरकः स्मृतः॥४॥ ॥१९॥
॥ ॥ पित्तोल्बणः सन्निपातो यस्य जंतोः प्रकुप्यति॥ तस्य दाहज्वरो घोरो व

धौ

हिरंतश्चवर्तते ॥ शीतंचसेव्यमानस्यकुप्यंतः कफमारुतौ ॥ ततश्चैनंप्रबाधंते
हिक्काश्वासप्रमीलकाः ॥ विषूचिकापर्वभेदः प्रलापोगौरवंभ्रमः ॥ नाभिपार्श्वरुजा
तस्यखिन्नस्याऽश्रुविवर्धते ॥ छिद्यमानस्यरक्तंचस्रोतोलेपः संप्रवर्तते ॥ श्लेन
पीड्यमानस्यतृष्णाश्वासश्चवर्धते ॥ असाध्यः सन्निपातोयंशीघ्रकारीतुकथ्यते
नहिजीवत्यहोरात्रं अनेनाविष्टविग्रहः ॥ ५ ॥ ॥ कफोल्बणः सन्निपातोयस्यज
तोःप्रकुप्यति ॥ तस्यशीतज्वरस्वप्नगौरवालस्यतंद्रकाः ॥ छर्दिमूर्च्छातृषादाहह
ह्मारोचकहृद्ग्रहाः ॥ ष्ठीवनंगुरुत्वमाधुर्यंस्रोतोवाग्वृत्तिनिग्रहः ॥ जयत्वह्मोवि
मूलेवात्रिरात्रंनहिजीवति ॥ मेदोगतः सन्निपातोकेवलः समुपाहतः ॥ कामू
मोहात्कलोभात्त्वभयाच्चायंप्रपद्यते ॥ ६ ॥ मध्यहीनादिकेदोषेसन्निपातो
यदाभवेत् ॥ तस्यरोगास्त्रयएवोक्ताः प्रायोदोषबलाश्रयाः ॥ तद्रति ॥ वि

दृतोनियमोनास्तीतेनविकृतिसमवायारब्धाः॥ अनेकप्रकाराभवंतिसुश्रुतस्तुदोषोत्क
॥२०॥ र्षापकर्षतारतम्येनधात्वावरणभेदेनसन्निपातभेदानामानंत्यत्वात् नोक्तवान्॥ अतोतु
ल्यकुपितेदोषेरेकमेवसन्निपातलक्षणंपठति॥ तद्यथा॥ नात्युष्णशीतोऽल्पसंज्ञोभ्रां
तप्रेक्षीहतस्वरः॥ खरजिह्वाशुष्ककंठः स्वेदविण्मूत्रवर्जितः॥ साश्रुनिर्भुग्ननयनोभ
क्तद्वेषीहतस्वरैः प्रभः॥ श्वससन्निपातितः स्रोते प्रलापोपद्रवान्वितः॥ तमभिन्यासमिति
न्यासमित्याहुः हतौजसमथापरे॥ सन्निपातज्वरंकृच्छ्रमसाध्यमपरेजगुः॥ इति॥
ननुवातादयःपरस्परंविरुद्धगुणाः॥ विरुद्धगुणानांच संभूयैककार्यारंभकत्वंनोप
पद्यते॥ परस्परोपघातत्वात्॥ दहनतुहिनयोरिव॥ तत्कथंसन्निपातिकविका
रोत्पादकइत्युच्यते॥ दृढबलोक्तहेतुद्वयात्तुगयदासश्चोक्तवान्॥ दैवाद्दोषस्वभावा ॥२०॥
द्वादोषाणांसन्निपातिके॥ विरुद्धैश्चगुणैःकश्चिन्नोपघातःपरस्परइति॥ ६९॥

सु

दोषेविवृद्धेनष्टेऽग्नौसर्वसंपूर्णलक्षणं॥ सन्निपातज्वरोसाध्यः कृच्छ्रसाध्यस्ततोन्यथा॥ ॥६८॥ ॥ अथसंक्षेपतः सन्निपातज्वरस्यासाध्यंहिलक्षणमाह॥ दोषेविवृद्धे॥ लघुलंकशार्ङ्धरे॥ वायुःपित्तंकफोदोषाधातवश्चमलास्तथेति॥ विवृद्धइतिवचनात् ॥ अनविपाकादेवगंलव्यं॥ सर्वाणिसंपूर्णलक्षणानियस्यसतथा॥ इद नष्टाग्नित्वं॥ तदोन्यथाविरुद्धाः॥ अविवृद्धदोषः अल्पलक्षणः॥ कृच्छ्रसाध्यः॥ असा ध्योऽसाध्यः॥ ततोन्यथाविदग्धाः॥ अविवृद्धदोषः सुखसाध्योनभवतीतिदर्शितः॥ उक्त ध्यकृच्छ्रसाध्यासिधानेनसन्निपातज्वरः सुखसाध्योनभवतीतिदर्शितः॥ यस्कृतत्रणवेज्जेता चप्रालुकिनी॥ तत्कृनासहयोद्रव्यंसन्निपातचिकित्सीते॥ यस्कृतत्रणवेज्जेता सजेतामयसंकुले॥ सुश्रुतेपिसन्निपातज्वरस्यमोक्षवधयोरपिकालोदर्शितः॥ सप्तमेदिवसेप्राप्तेदशमेद्वादशेपिवा॥ पुनर्घोरतरोभूत्वाप्रशमंयातिहंतिवा॥ एषात्रिदोषमर्यादा भालुकिनाप्युक्तं॥ सप्तमीद्विगुणायावन्नवम्येकादशीतथा॥ पित्तकफानिलवृध्यादशादिवसद्वादशाहस्से मोक्षायचवधायच॥ उक्तंच॥

४१

॥२१॥

साहात् ॥ हंति विमुंचति पुरुषं त्रिदोषजो धातुमलपाकात् ॥ अस्यार्थः ॥ वाताधिकः सप्तदिने पित्ताधिकः दशमे दिने श्लेष्माधिके द्वादशे ऽनेन क्रमेण मलपाकात् मलोपः लेषां पाकः पक्वाव धित स्मादि सुंचति ॥ धातुपाकं इति ॥ धातुपाल लक्षणं तत्रांतरे ॥ संबाध्यमाने हृदि नाभि देशे गात्रेषु वा पाकरुजो ऽन्यलेषु ॥ पक्वेषु वाते गुरुजा ज्वरार्त्तस धातुपाकीक थितो भिषाग्भिः ॥ तत्रांतरेपि ॥ दशाहा दशास साहेः पित्तश्लेष्मानिलाधिकः ॥ दग्धोष्मणा धातुमलान् हंति मुंचति वा ज्वर इति ॥ सन्निपातोद्रवमाह ॥ सन्निपातज्वरस्यांते कर्णमूले सुदारुणः ॥ शोथः संजायते तेन कश्चिदेव प्रमुच्यते ॥ अस्यार्थः ॥ कर्णमूले दारुणो रोगरुजादी युक्तः ॥ तेन शोथलक्षणे पद्रवे कश्चिन्मुच्यते ॥ प्रकृति कर्मवशा दित्यर्थः ॥ ८४ ॥ ७२ ॥ ७७ ॥ ॥ अपि नाचाभिधातास्यां अपि रुष्णं गाणित्रा पतः ॥ आगंतुर्जायते दोषैर्यथास्वं तं विभावयेत् ॥ ७५ ॥ शावास्यतावि

॥२१॥

पक्वले तथातीसार एव च प्रकारुचिः पिपासा च तोदश्च सहर्षः स्यात्॥ ८६॥ ॥ अथा
गंतुज्वरलक्षणमाह॥ अभिचारः श्येनादियागकृतः विपरीतमंत्रैर्लोहसर्षपादि
होमः॥ अभिघातोऽस्य हननं॥ मुष्टिलगुडलोष्टकाष्ठशस्त्रादिना॥ अभिषंगः कामा
दीनामप्रतानां संबंधः॥ उक्तं च तंत्रे॥ कामशोकभयक्रोधैरभिषक्तस्य यो ज्वरः॥
सोऽभिषंगज्वरो ज्ञेयो यश्च भूताभिषंगकः॥ अभिशापः ब्राह्मणगुरुवृद्धसिद्धान
मभिशापनं॥ तं च आगंतुज्वरं यथास्वं दोषैर्जानीयात्॥ कामशोकभयाद्वा
युरित्यादि॥ अयं च दोषसंबंधः॥ पश्चाद्भावी न त्वारंभक इति संप्राप्तवसरे
निरूपितः॥ ८९॥ ९०॥ अथ आगंतुकज्वराणां वैशिष्ट्यमाह॥ विषकृते ज्वरे स्या
दास्यता श्यामता नु विद्रुक् हृष्टो वर्णः॥ श्यामवर्ण इत्यन्ये॥ विषकृते स्थावरादि
विषभक्षणादिकृते॥ विषस्य त्रिदोषकत्वेऽपि अत्यंतपित्तकरत्वात् श्याव
मुखत्वं॥ अतिसारः स्थावरस्याऽधोगतत्वात्॥ तोदो व्यथा॥ शेषं सुगमं॥ ८१॥

43

औषधीगंधजे मूर्छा शिरोरुग्वमथुस्तथा॥ कामजे चित्तविभ्रंशस्तंद्रालस्यमभो-
॥२२॥ जनं॥ ४७॥ हृदये वेदना चास्य गात्रं च परिशुष्यति॥ भयात्प्रलापः शोकाच्च भ-
वेत्कोपाच्च वेपथुः॥ ४८॥ अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते॥ भूताभि-
षंगादुद्वेगो हास्यरोदनकंपनं॥ ४९॥ आगंतूनामन्यदपि वैचित्र्यमाह॥ कामजे अ-
भिमतकामिन्याद्यप्राप्तिः॥ निमित्तजे चित्तविभ्रंश इत्यत्र॥ किंकर्तव्यमूढत्वं॥ यदुक्तं
वाग्भटे॥ कामाद्भ्रमोऽरुचिर्दाहो ह्रीनिद्राधीधृतिक्षयः इति॥ शेषं सुगमं॥ ४७॥
भयात्प्रलापः असंबद्धभाषणं॥ वेपथुः कंपः॥ भयाच्छोके ज्वरे एवं शोकात्
कोपादित्यत्रापि बोद्धव्यं॥ शोकात्प्रलाप इति संबंधः॥ अन्ये निदानमपि शोकाच्च
क्रुद्धस्यैव वति॥ प्रलापश्चात्र वालकार्यः॥ यद्येवं तत्कथं॥ क्रोधाद्वेपथुः॥
क्रुद्धश्च वेपमानो हृष्यते न हि हर्षे हर्षेऽनुपपन्नं॥ कोपाच्चेति चकारेण शिरो- ॥२२॥
रुजं समुच्चिनोति॥ यदाह वाग्भटः॥ क्रोधात्कंपः शिरोरुक् च प्रलापोऽस्य

शोकइति ॥ मानसत्वाविशेषेऽपि भयजादीनां पृथगुपादानं हेतुप्रत्यनीकचिकित्सार्थमिति ॥
तद्वमाच्चेति चकारात् अभिचारजे ज्वरे दाहादिकं समुच्चिनोति ॥ यदुक्तं हरिलाथीनुवादि
नानागमहेन ॥ तत्राभिचारिकैर्मंत्रैर्हूयमानस्य तप्यते ॥ पूर्वं चेतस्ततो देहो विस्फोटतृष्णे स्त्रे
दृष्टभ्रमकम्पैः ॥ स दाहमूर्च्छाग्रस्तस्य प्रत्यहं वर्धते ज्वरः इति ॥ अभिचारो मंत्रादिभिः
मारणप्रयोगैः ॥ अभिशापः द्विजगुरुसिद्धानामाक्रोशः ॥ भूतादेर्वग्रहादयः तेषा
मारणप्रयोगैः ॥ अभिशापः द्विजगुरुसिद्धानामाक्रोशाः ॥ भूतादेर्वग्रहादयः तेषा
मभिषंगः ॥ संबंधः ॥ भूतानां देवग्रहाणां त्वपि सामंतलोभावेन संयोगो भूताभिष
मभिषंगः ॥ संबंधः ॥ भूतानां देवग्रहाणां त्वपि सामंतलोभावेन संयोगो भूताभिष
गः ॥ उद्वेगो उद्विग्नचित्तता ॥ शेषं सुगमं ॥ ४८ ॥ ४९ ॥ ॥ कामशोकभयाद्वायुः क्रो
धात्पित्तं त्रयो मलाः ॥ भूताभिषंगात्कुप्यंति भूतसामान्यलक्षणः ॥ ५० ॥ दोषो सोऽपि
धात्पित्तं त्रयो मलाः ॥ भूताभिषंगात्कुप्यंति विषमज्वरं ॥ ५१ ॥ ॥
तसंभूतो ज्वरोत्सृष्टस्य वा पुनः ॥ धातुमन्यतमं प्राप्य करोति विषमज्वरं ॥ कामशोकाभ्यां वायुः प्रकु
अथ आगंतुजेषु प्रतिनियतदोषानुबंधान् दर्शयन्नाह ॥ कामशोकाभ्यां वायुः प्रकु
प्यति ॥ क्रोधात्पित्तं ॥ भूयो मलाः त्रयो दोषाः ॥ भूताभिषंगात्कुप्यंति ॥ भूतसामान्य
लक्षणादिति ॥ यस्य भूतस्य ग्रहादेरभिषंगात्कुप्यंति ॥ तस्य लक्षणं रोदनादिना

५०
५१

॥५२॥

सामान्यलक्षणं यथांते ॥ तथा दोषबलरूपाणि भवंती त्यर्थः ॥ तत्र वक्ष्यमाणउक्तो देशिदाने द्रष्टव्यमिति ॥ ५० ॥ अथ विषमज्वरसंप्राप्तिमाह ॥ अल्पदोषे इति अनुमानेन अल्पत्वात् कालविशेषमवाप्य लब्धबलो ज्वरो ज्वरयति ॥ यस्य बलवान् स्तनित्यज्वरमेव करोति ॥ अहितसंभूत इति ॥ अहिताहारादिजनितः ॥ ज्वरोऽस्य सूक्ष्म सहसानिवर्तते ज्वरस्य ॥ वाचाद्येन प्रथमतोऽपि विषमज्वरो भवतीति दर्शयति ॥ यदुक्तं ॥ आरंभाद्विषमो यस्तु इत्यादि ॥ धातुमन्यतमं रसरक्तादिकं प्राप्य विषमज्वरं तृतीयादिकं करोति ॥ विषमज्वरलक्षणं सामान्येन भोक्तुकिनापठितं ॥ लघयाः ॥ यस्याः नियतात्कालात् शीतोष्णाभ्यां तथैव च ॥ वेगतश्चापि विषमो ज्वरः स विषमस्मृतः इति ॥ ५१ ॥ ५१ ॥ ५१ ॥ ॥ संततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ ॥ संततं रसरक्तस्थः सोऽन्येद्युः पिशिताश्रितः ॥ ५२ ॥ मेदोगतस्तृतीयेऽह्नि त्वस्थिमज्जागतः पुनः ॥ कुर्याच्चातुर्थिकं घोरमंतकं रोग

॥५२॥

संकरं ॥ ५२ ॥ ॥ एते धातुगताः देशस्थानविभागेन विषमज्वराः ॥ संततादिज्वराणां
प्रतिनियतदूष्यान् धातूनाह ॥ रसास्के दोषः संततज्वरं करोति ॥ यो दोषो रसकाश्रयः
संततं ज्वरं करोति ॥ स संततशब्दः सततस्योपलक्षणः ॥ तेन सततमिति कुशोन्ने
यः ॥ यदुक्तं चरके ॥ रक्तधात्वाश्रयः प्रायो दोषः सततकं ज्वरमिति ॥ रसयुक्तं योत्र
विशेषपरं ॥ सर्वज्वरे रसस्याऽस्य दूषत्वात् ॥ अन्ये तु संततं सातत्यार्थं मन्यमानाः ॥
संततो रसरक्तस्थो इति पठंति ॥ तत्रोक्तं सुश्रुते ॥ अत्राहि संततसततशब्दौ संताप
रौ न तु सातत्यकथनौ ॥ तेन संततशब्देन सततकस्याऽनभिधानात् कथमेकदो
षः ॥ तत्रान्ये पाठः ॥ संततो रसरक्तस्थ स सततो रक्तधातुगः ॥ संततश्चैव विज्ञेयः अ
न्येद्युः पिशिताश्रिताद्यम् ॥ पिशिताश्रितः स दोषः ॥ अन्येद्युष्कं करोतीत्यर्थः ॥
तेनैव संबंधः ॥ ५३ ॥ ॥ मेदोगतो दोषः ॥ तृतीयेऽह्नि कुर्यात् ॥ तृतीयकमिति बोध
व्यं ॥ अस्थिमज्जागतो दोषः चतुर्थेऽह्नि चातुर्थकं कुर्यात् ॥ घोरं दुःसहं कष्ट

मि

47

॥२४॥

कारिणं॥ अंतकं यमसदृशं मारणात्मकत्वात्॥ रोगसंकरं चिरात्केशेन प्रभूतरोगोत्पादकं॥ ॥५३॥२५॥ ॥ सप्ताहं वा दशाहं वा द्वादशाहमथापि वा॥ संतत्यायो विसर्गी स्यात् संततः स निगद्यते॥५४॥ ॥ इदानीं एकदोषादीनां संततज्वरस्य विसर्गकालावधिं नालक्षणमाह॥ संतत्या अविच्छेदेन नैरंतर्येण सप्ताहादीन् व्याप्य अविसर्गी अत्यागशीलः स ज्वरः संततः॥ अयं च सुखसाध्यः॥ तथा चोक्तं तंत्रांतरे॥ संततज्वर एवान्यः स्वल्पो दुर्बलकारकः॥ एकदोषो द्विदोषो वा सुखसाध्यः प्रकीर्तितः इति॥ तथा च॥ वातिकः सप्तरात्रेण पैत्तिकः श्लेष्मिके द्वादशाहेन वज्वरः पाकं नियच्छति॥ प्रकृतिसमसमवेतत्वात्॥ एकदोषादि दोषजा भवंति ते साध्या इत्यभिप्रायः विकृतिसमवायारब्धा संततादयः सन्निपातजा असाध्या इत्यर्थः॥ ननु कथमस्य विषमज्वरे पाठः॥ यदुक्तं खारणादेन॥ ज्वराः पंचमयोक्ता ये पूर्वं संततकादयः॥ चत्वारः संततं हित्वा ज्ञेयास्ते विषमज्वरा इति॥ सुलानुबंधित्वं विषमत्वं॥ विमुंचानुबंधत्वात्॥ तच्चात्र नास्ति॥ नैवं अस्य पित्तथाभावात्॥ तथा च लक्षणे चरकः॥ विसर्गं द्वादशे कृत्वा दिवसेऽव्यक्तलक्षणः॥ दुर्लभोपशमः कालं दीर्घमप्यनुवर्तते

॥२५॥

ते ॥ ५४ ॥ एते विकल्पाः यथाक्रमं वात पित्त कफोल्बणत्वेन विज्ञेयः ॥ उक्तं च ॥ पित्तकफानिलवृद्ध्या
द्वादशदिवसद्वादशाहसप्ताहात् ॥ हन्ति विमुञ्चति वा रूक्षं त्रिदोषजो धातुमलपाकात् ॥ आरत्यान्न
कानुबंधित्वं विषमत्वं ॥ न तु एककालाभाविलेन ॥ यथा एककालं दुःखाभ्यवहारेणाः न त्रा नव्यपदे
न्ताः ॥ तस्मात् विषमज्वरो लेखेनन्या विकित्सोक्ता यासंतत वर्जं सततादिषु कार्येति प्रतिपा
दनार्थं ॥ उक्तं च ॥ कर्मसाधारणं सर्वविषमज्वरे कार्यं ॥ विशेषेण तृतीयचतुर्थयोरिति ॥
अन्यथा ॥ उक्तं तत्रान्तरविरोधादिति ॥ ५३ ॥ ५४ ॥ ॥ अहोरात्रे सततकौ द्वौ कालावनुवर्त्त
ते ॥ अन्येद्युष्कस्त्वहोरात्रमेककालं प्रवर्त्तते ॥ ५५ ॥ तृतीयकस्तृतीयेऽन्हि चतुर्थेऽन्हि
चतुर्थकः ॥ केचिद्भूताभिषङ्गोत्थं वदंति विषमज्वरं ॥ ५६ ॥ ॥ अथ सततकादीनां
चतुर्णां कालानुवर्त्तनत्वेन लक्षणमाह ॥ कालाः षट् पूर्वान्हि मध्यान्हाऽपराण्ह प्रदोषा
ऽर्धरात्रप्रत्यूषाः ॥ तत्र पूर्वान्ह प्रदोषयोः कफस्य कालः ॥ मध्यान्हाऽर्धरात्रयोः पित्तस्य ॥
अपराण्ह प्रत्यूषयोः वायोः ॥ पूर्वान्हादीनां षण्णां कालानां मध्ये कालद्वयं अनुवर्त्त
ते वेगं करोति स सततः ॥ अन्येद्युष्को ज्वर एककालमनुवर्त्तते वेगं करोति ॥ अ

होरात्रादन्यस्मिन्नहोरात्रे एककाले मागच्छतीति ॥ तृतीयकस्तृतीयेह्नि एककालमिति संबध्यते ॥
॥२५॥ चतुर्थकश्चतुर्थेह्नीत्यत्राप्येककालमिति ॥ एवं द्वौ कालाविति द्वागनः ॥ वेगदिनापेक्षया त
तीयेन्ही नियमोऽभवति स्तृतीयकः ॥ एवं चतुर्थके वाच्यं ॥ यदुक्तं ॥ तत्र दोषोत्कर्षोऽपक
र्षाभ्यां अधिककालत्वं हीनकालत्वमपि ज्ञातव्यं ॥ न तु नियमः ॥ येषां चोत्पत्तिक्रमः ॥ व
क्ष्यमाणस्तादवगंतव्यः ॥ तदाह ॥ अहोरात्रादहोरात्रं स्थानात्स्थानं प्रपद्यते ॥ ततश्चामा
शयं प्राप्य करोति विषमज्वरं ॥ कफस्थानविभागेन यथासंख्यं करोति हि ॥ सततान्येद्युष्क
त्र्याख्यचतुर्थकान्सप्रलेपकानिति ॥ अस्यार्थः ॥ आमाशय हृदय कंठ शिरः संधयः
पंच श्लेष्मस्थानानि ॥ एषु स्थितैर्दोषैर्यथासंख्यमासंततादयः क्रियते ॥ तत्राऽमाशय
स्थितेन दोषेण सततः क्रियते ॥ परं द्विकालं न च सर्वदा ॥ आमाशयमासासर्वदाभसं
गः ॥ अहोरात्रेषु कालेषु कोपकालापेक्षया ज्वरोत्पत्तेः ॥ हृदयस्थितेन दोषेण आ
माशयगुप्ता अन्येद्युष्कः क्रियते ॥ सततारंभकदोषापेक्षया अस्य वन्हिलघुत्वात् ॥ ॥२५॥
कंठस्थितेन दोषेण एकस्मिन्दिने हृदयमागम्यते ॥ अपरस्मिन्नामाशयमाग

स्तज्वर आरभ्यते॥ तृतीयकः॥ एवं शिरःशिरस्थीतेन दोषेण कंठहृदयामाशयात् त्रिभिर्दि
नैः क्रमेण प्राप्य चतुर्थकः क्रियते॥ पुनः स्वस्थानमागमनं तु दोषाणां दलवेगत्वेन लौ
घवात्॥ वेगं दिन एव भवति॥ संधिस्थितेन दोषेण प्रलेपः॥ संधयश्चामाशयेपि॥ सं
तति सर्वदाभावः॥ अविषमोप्ययं विषमसहचरितः पठितः॥ कफस्थानोत्पादकानु
धात्॥ प्रलेपकस्त्विहै व अग्रे वक्ष्यते॥ परकीयमतमाह॥ केचित् आचार्याः विषमज्वरं
भूताभिषंगो कथयंति॥ अत एव विषमज्वरे दैवव्यपाश्रयं बलिहोमादि भूतोचितं युक्ति
व्यपाश्रयं कषायपानादि दोषोचितं विधीयते॥ यदाह चरकः॥ कर्मसाधारणं जह्यात् तृतीय
कचतुर्थकौ॥ आगंतुरनुबंधो हि प्रायशो विषमज्वर इति॥ तत्र साधारणमिति दैवव्यपा
श्रयमिति व्याचक्षते॥ तंत्रांतरे॥ कश्चिद्दुष्टेन शीतेन कश्चिद्रात्रौ कश्चिद्दिवा॥ प्रत्यामंया
लिको पं च ज्वरः सविषमः स्मृत इति॥ अन्यत्रापि॥ अधिशेते यथा भूमिं बीजं काले
व्यपोहति॥ प्ररोहति॥ अधिशेते तथा धातून् दोषः काले प्रकुप्यतीति॥ ५६॥ ६७॥

51

कफपित्तात्त्रिकग्राही पृष्ठाद्वातकफात्मकः ॥ वातपित्ताच्छिरोग्राही त्रिविधः स्यात्तृतीयकः ॥५७॥ ५७
॥२६॥ चातुर्थको दर्शयति प्रभावं द्विविधं ज्वरः ॥ जंघाभ्यां श्लैष्मिकः पूर्वं शिरसोऽनिलसंभवः ॥ ५८
॥५८॥ ॥ उक्तलक्षणो दोषैः प्रतिदिनं तृतीयकचतुर्थयोर्लक्षणमाह ॥ तृतीयकस्त्रिविधो भ
वति ॥ कथं कफपित्तात्त्रिकग्राही वेदनया त्रिकव्यापि ॥ त्रिकस्य वातस्थानत्वं ॥ तत्क
थं तद्ग्रहणे पित्तकफौ ॥ अन्यस्थानगतत्वेन दुर्बलौ तृतीयदिने वेगं कुरुतः ॥ उच्यते ॥
प्रकृतिस्थानां दोषाणां स्थाननियमो न कुपितानां ॥ यदुक्तं सुश्रुते ॥ कुपितानां हि दोषाणां
शरीरे परिधावतां यत्र संगः स्ववैगुण्यात् व्याधिस्तत्रोपजायते ॥ एवमन्यस्थानगत
त्वेन चतुर्थकेपि वाच्यं ॥ वातकफात्मको ज्वरो वेदनया पृष्ठात् ॥ वातपित्ताद्वेदनया शि
रोग्राही ॥ एवं त्रैविध्यं ॥ चातुर्थको द्विःप्रकारो त्रलिंदर्शयति ॥ जंघाभ्यां श्लैष्मिकः ॥
अनिलसंभवः शिरसः वेदनयेसर्थः ॥ चातुर्थिकः पित्तेनाक्रियते ॥ इत्येके ॥ आ ॥२७॥
धिरयभावात् पित्तजगलगंडवत् ॥ हरितस्तु चातुर्थिकोपि पैत्तिको त्ली लिवदंति ॥

चातुर्थिकोनामगदोदारुणो विषमज्वरः॥ शोषणः सर्वधातूनां बलवर्णाग्निनाशनः॥ त्रि
दोषजो विकारस्यादस्थिमज्जागतोनिलः॥ कुपितं पित्तमेवं तु कफश्चैव स्वभावतः॥
अत्राहुः॥ अनुबंधरूपी पमत्रपितंन त्वारंभकं॥ कथमेषां प्रतीतिः स्थान विशेषान
भिधानात्॥ वाग्भटेनत्रेस्थानमप्यकं॥ उर्ध्वकायंतु यः पूर्वं गृण्हाति सोनिलात्मकः॥
मध्यकायंतु गृण्हाति पूर्वं यस्तस्य पित्तजः॥ पूर्वं गृण्हात्यधः कायं श्लेष्मरक्तश्चतुर्थ
कः इति॥ तस्मात्तत्रायेणकफवाताभ्यां प्रभवतीति पैत्तिकश्चातुर्थिकश्चर कादिभिर्नोद्दा
हृतः॥ न तत्संभवादिति मंतव्यं॥ ५८॥ ५९॥ ६०॥ विषमज्वर एवान्यश्चातुर्थकविपर्ययः॥
स्तमध्येज्वरयत्यन्हिआद्यंतेन्च विमुंचति॥ पाठांतरे॥ अहोंद्ज्वरयतिदिनमेकं विमुंच ‹६१›
ति॥ ॥ अथ चातुर्थकविपर्ययमाह॥ विजमेत्यादि॥ आद्यंते जोहोएकदिनं सद्कुदिन
द्वयमध्ये प्रहत्वा जले एकदिनं भवतीति विमुंचति॥ तंत्रांतरे॥ जस्थिमज्जोभय
गलेचा तुर्थक विपर्ययः॥ इति पाराशार वचनस्यापि स एवार्थः॥ त्र्यहात्रिपाठे॥
त्र्यहस्यादिनमुं[illegible] चति॥ दिनद्वयज्वरयति॥ त्र्यहस्यांतेच तुर्थदिने मुंचतिइति॥

ज्वर
॥२७॥

व्याचक्षते ॥ हरिश्चंद्रस्तु ॥ द्वे अहनि निरंतरं ज्वरयित्वा परमेकमहः पुनर्न ज्वरयति ॥ एवं
चतुर्थकविपर्ययः ॥ आदिदिनाभ्यां द्वयोपातिदिने च वथायुः ॥ ॥ चतुर्थकविपर्यय
स्योपलक्षणत्वेन तृतीयकविपर्ययोपग्रहः ॥ तद्यथा ॥ मध्ये एकं दिनं ज्वरयति ॥ आ
द्यंतयोर्विमुंचतीति तृतीयकविपर्ययः ॥ कालद्वयं मुंचति सर्वमहोरात्रं ज्वरयती
ति सततकविपर्ययः ॥ एककालं विमुंच्य सर्वमहोरात्रं व्याप्नोत्यन्य द्युष्कविपर्ययः ॥
अत्र दोषविकृतिरेव नानाविधहेतुरिति ॥ पूर्वोक्ते षु कफस्थानेषु विभागेन प्रतिष्ठन्दो
षो द्वित्रिचतुर्थविपर्ययं कुरुते ॥ उक्तं च ॥ कफस्थानेषु वा तिष्ठन् दोषो द्वित्रिचतु
र्षु वा ॥ विपर्ययाख्यान् कुरुते विषमान् कृच्छ्रसाधनान् ॥ नानाविधा एव विष
मज्वराः दृश्यंते ॥ एषोन्याय ज्वरक भुक्तलया ई एवं धमति ॥ बाष्पं च क्रूरएर
रिति ॥ भुक्तले विषमज्वराणामुपशांतवेगानामपि देहवल्लस्यानदृतिं ॥
॥ तद्यथा ॥ स चापि षमोदहान कदाचिद्विमुंचति ॥ यस्माद्गौरववैवर्ण्य
कार्श्येभ्यो न विमुच्यते ॥ वेगे तु समतिक्रांते गतोयमिति लक्ष्यते ॥ गौरवन्ति

॥२७॥

र सोऽग्लानिर्नातिश्च प्रातिभोजने माधुर्यमप्येवैरस्यं तिक्तत्वमथवा पुनः॥ वक्रस्यजा
यते यस्मात्प्रवेगे पिंगलेत्त लि॥ तस्मात्तु नियतो दुष्टः शरीरे विषमज्वरः॥५९॥
नित्यं मंदज्वरो रूक्षः शूनः कृच्छ्रेण सीदति॥ स्तब्धांगः श्लेष्मभूयिष्ठो नरो वातबलासकी॥६०॥
प्रलिंपन्निव गात्राणि घर्मेण गौरवेण च॥ मंदज्वरविलेपी च सशीतः स्यात्प्रलेपकः॥६१॥
॥ ॥ ॥ वातबलासकज्वरमाह॥ वातबलासकारव्यो ज्वरोऽस्यास्तीति वातबलासकी नरः॥
तेन ज्वरेण सूनकः॥ शोथी शोथी इति॥ अवसन्नो भवति॥ कोऽपि नः स उपद्रव इत्यर्थः॥
कीदृशः॥ नित्यं मंदज्वरः मंदवेगः॥ नित्यं सततं॥ वातबलासकारणत्वात् वातबलास
कः॥ नान्येन॥ श्लेष्मपित्तसमत्वादपि बोधव्यं न श्लेष्मणो पित्तानुगतत्वेनोति ज्वरः॥ रू
क्षत्वं चास्य वातपित्तानिशरलत्वात्॥ माधिप्रभावाद्वा स्तब्धांगश्च श्लेष्मभूइष्ठश्च॥ प्र
श्लेते॥ प्रलेपकं वातबलासकं च कफाधिकत्वेन वदंति तज्ज्ञाः॥ अन्यत्र तु वाताधिकत्वे
नैव दृष्टिः॥ तत्कथं श्लेष्मभूइष्ठमत्र कथ्यते॥ उच्यते॥ वातेरितः सर्वेषु धिकफार
ब्धत्वात्॥ वातबलासकस्य यथार्थनामा वातेरितः बलासक आरंभको यस्येति

६०
६१
६

ष्मनः॥ कुष्ठेण सिध्मलिद्गलिपाठांतरेणैवातबलासकं॥ एके कुंभाकयं पांडुरोगविषयमाहु
रितिगयदासः॥ ६० ॥ प्रलेपकलक्षणमाह॥ मंदज्वरश्वासो प्रलेपी धूमंदज्वर प्रलेपि॥ ॥२८॥
मंदज्वरविले पित्वेन्वास्युयस्मात्॥ धर्मेणाऽलपेनैव गौरवेण गुरुत्वेन वालिंपतिसं
वध्नातिगात्राणि प्रलेपावल्योज्वरः शीतयुलः अयंचकफपित्तजः॥ उक्तंसुश्रुते॥ ज्व
रोदाहोलिसारश्च पित्ताद्रक्तस्यचागमः॥ यक्ष्मणिन्वायंप्पवति॥ अन्येतुत्रिदोषजय
क्ष्मजनितत्वेनत्रिदोषजएवायं मन्यंते॥ उक्तत्वेन कफपित्तमपदेशः॥ यदुक्तं
तथाप्रलेपकोज्ञेयोशोषिणः प्रायशोनरान्॥ दुश्चिकित्स्यतमोमंदः सकष्टोधातुशो
षकृत्स्मृति॥ ६१॥ ६२॥ ६२॥ ६१॥ ॥ विदग्धोनरसे देहश्लेष्मपित्तेव्यवस्थिते॥ तेना
र्धेशीतलं देहं अर्धंचोष्णं प्रजायते॥ ६२॥ कायेदुष्टेयदापीतं श्लेष्मान्तेव्यवस्थि
तः॥ तेनोष्णत्वंशरीरस्य शीतत्वंहस्तपादयोः॥ ६३॥ ६२॥ कायश्लेष्मायदादुष्टः ॥२८॥
पित्तंचातेव्यवस्थितं॥ शीतलत्वेन गात्राणां उष्णत्वं हस्तपादयोः॥ ६४॥ त्वक्स्थौ
श्लेष्माऽनिलौशीतमादौजनयतोज्वरं॥ तयोः प्रशांतयोः पित्तमंते दाहंकरोतिच॥ ६५॥

६६

तस्मिन्प्रशांते चरितो कुरुतेः शीतमंमतः॥
करोत्यां सेत थापित्तं त्वकस्थं दाहमतीवच॥ तस्मिन्प्रशांते ... तथा देहे श्ले
॥६६॥ ॥ ॥ अथ विषमज्वर विशेषमाह॥ विदग्धेन्नरसे दुष्टहाररसे॥ अर्धं चोष्णं पित्ते
ष्मपित्ते दुष्टे व्यवस्थिते स्मति॥ तेन हेतुना देहे अर्धं शीतत्वं कफेन॥ अर्धं चोष्णं पित्ते
नप्रजायते॥ अर्धत्वं अर्धनारीश्वरकारेण वायया दोषमवस्थितो भवति॥ तेन
हेतुना शरीरस्योष्णत्वं॥ हस्तपादयोः शीतत्वं॥ उक्तार्थस्य विपर्यये ज्वरांतरमाह॥
वैपरित्येन पूर्वत आख्येयं॥ ॥ अतः परं संततादीनां शीतदाहपूर्वकत्वेन भेदमा
ह॥ यदा श्लेष्मानिलौ त्वचि कुपितौ भवतः॥ तदा ज्वरस्यादौ त्वचि शीतं जनयतः॥
तदुपचारेणेति गदाधरः॥ जेजटस्तु
तेक शब्देन त्वकस्कंधस्य उच्यते॥ तयोः श्लेष्मानिलयोः प्रशांतवेगयोः स्वकालापगमात्॥ प्रत्यनी
कत्वमेवाह॥ तयोः श्लेष्मानिलयोः प्रशांतिर्भवति॥ परं वेगापगमात्॥ यदुक्तं
के प्राहुर्या वा विषमेषु दोषस्य प्रशांतिर्भवति॥ पूर्वमेव मुक्तं भवति॥
कते॥ सच्चालि विषमो देहे न कदाचिद्विमुंचति॥ पूर्वमेव मुक्तं भवति॥

५७

चेति च कारात् नरू छर्दिः ॥ यदा
यदा तो प्रशांत वेगो न बलः ॥ तदा पित्तं अंते दाहं करोति ॥ त्वग्दाहकारके पित्ते प्रशांतवेगे स
॥२९॥ लपित्तं त्वक्स्थं प्रवर्तितदा त्वचि अतीव दाहं करोति ॥ अपि शब्दात् मधुतं द्राद यः ॥ ६६ ॥
ति तावपि इतरो श्लेष्मानिलो अंततः शीतं कुरुतः ॥ दाहपूर्वस्तयोः कष्टः कृच्छ्रसा
॥६५॥६९॥ ॥ द्वावेतौ दाहशीतादि ज्वरौ संसर्गजौ स्मृतौ ॥ दाहपूर्वस्तयोः कष्टः कृच्छ्रसा
ध्यस्तथेतरः ॥ ६७ ॥ गुरुता हृदयोत्क्लेदः सदनं छर्द्यरोचकौ ॥ रसस्थे तु ज्वरे लिं
गं दैन्यं चास्योपजायते ॥ ६८ ॥ ॥ तावेतौ दाहशीतादि संसर्गजौ कथितौ ॥ एको
दाहादिः अपरः शीतादिः ॥ तयोर्दाहशीतपूर्वकयोर्ज्वरयोर्मध्ये दाहपूर्वकः क
ष्टः कृच्छ्रसाध्य इति विशेषणद्वयो पानात् ॥ अत्यर्थदुःख
दात्वं तदुःखप्रदः ॥ कष्टः कृच्छ्रसाध्य इति विशेषणद्वयो पानात् ॥ अत्यर्थदुःख
साध्यत्वं दर्शितं ॥ ननु एतयो स्त्रिदोषजत्वमुक्तं ॥ तत्कथं संसर्गजावित्युक्तं ॥ उ ॥२९॥
च्यते ॥ संसर्गजः सौम्याग्नेय दोषद्वयमेलकः ॥ तत्र शीतादौ ज्वरे पित्तानुबंधः
दाहादौ ज्वरे पित्तकफानुबंधौ ॥ अनुबंधस्य प्राधान्येन चिकित्सित इत्यनु

दो २

58

बंधात्संसर्गजा विस्फलं॥ न विरोधः॥ शीतपूर्वकस्य सुखसाध्यत्वंकुतः रोगरालेरचिंत्सत्वो
त्वात्॥ अन्येतु विषमज्वरारात्रिज्वरादयोपि बोधव्याः इतिजेज्जटः॥ उक्तंचलंतोतरे॥
समोवातकफौ यस्य क्षीणपित्तस्यदेहिनः॥ रात्रौ भामोज्वरस्तस्य दिवाहीनकफस्य च॥
सर्वेषु विषमज्वरेषु अवैव स्यप्रभावी वायुः॥ यतः एवच अनुभ्रमते॥ नूनंनिलाद्वैवि
षमज्वरः समुपजायते॥ कफपित्ते हि निम्नयष्टे दूस यस्यनिलः सदेति॥ तथाविदेहो
पि॥ पवनोगतिवैराम्याद्विषमज्वरकारणमिति॥ रसादिधातुगतज्वरमाह॥ गुरु
तागात्राणां॥ हृदयोत्क्लेदः हृदयस्थस्य दोषस्योपस्थितत्वमनत्वमिव॥ सदनं अंग
ग्लानिः॥ दैन्यं क्लांतं चिलत्वात्॥ रसस्थे रसधातुगते ज्वरे॥ यद्यपि रसैकधा
तुप्राप्तासंततएवायं॥ तथाप्यनुक्रमधातुगतकथनार्थैवअत्र निर्देशः॥ ६८॥
॥ ६५॥ ६६॥ ६७॥ रक्तनिष्ठीवनंदाहोमोहोच्छर्दनविभ्रमौ॥ प्रलापः पिडिकातृष्णारक्त
प्राप्तेज्वरेनृणां॥ ६९॥ पिंडकोद्वेष्टनंतृष्णा सृष्टमूत्रपुरीषता॥ उष्मांतर्दाहवि

क्षेपो ग्लानिः स्यान्मांसगे ज्वरे ॥७०॥ भ्रत्रां स्वेदस्तृषा मूर्छा प्रलापो छर्दिरेव च ॥ दौ
॥३०॥ र्गंध्यारोचके ग्लानिर्मेदस्थे चासहिष्णुता ॥७१॥ भेदस्थांकूजनं श्वासो विरेकश्छ
र्दिरेव च ॥ विक्षेपं च गात्राणां एल हास्थिगते ज्वरे ॥७२॥ ६७॥ ॥अथ रक्तगत
ज्वरमाह ॥ मोहो विगलचित्तता ॥ तृष्णा पिपासा ॥ अन्नपीडिका दह्यते ॥ मांसगत
ज्वरमाह ॥ पिंडिका जान्वधोभागे मांसपिंडः ॥ तस्योद्वेष्टनं दंडादिपीडनेनेव वेदना ॥
स्पष्टमूत्रपुरीषता ॥ प्रवर्त्तमाने पुरीषत्वं मूत्रपुरीषयो बहुलं रोगप्रभावात् ॥
उष्मांतर्दाह विक्षेपो ॥ उष्मा बहिः अंतर्दाहः ॥ अन्ये उष्मांतर्मो हि विक्षेपो इति प
ठंति ॥ तत्र उष्मांतः अंतर्दाहइ स्पर्शः ॥ विक्षेपो हस्तपादादि चालनं ॥ ॥मेदो
गतज्वरमाह ॥ भ्रत्रां स्वेदइति अतिस्वेदा मलत्वो मेदाल ॥ तद्विक्ले सेवदौ गंध्यं
गात्रेऽसहिष्णुला वेदनासहत्वं ॥ क्रोधनत्वमिति कार्तिकः ॥ अस्थिगतज्वर ॥३०॥
माह ॥ भेदस्थ्यामिलिफो द इव भेदः पगवेलपीडे त्सर्शः ॥ कूजनं कुथनं ॥ अ
दौ

८०
८१
८२

न्येकुंजनमिलि चठंलि॥ तन्मते अस्या मेव संकोचइ सथः॥ स च सा निध्या दस्थामिस
नेन संबध्यते॥ शेषं सुगमं॥७२॥५९॥ ॥लमः प्रवेशान्ने हिक्काकास श्वासं च मिस्त
था॥ अंतर्दाहो महाश्वासो मर्मच्छेदश्च मज्जने॥७२॥ मरणं प्राप्नुयात्तत्र शुक्रस्थान
गते ज्वरे॥ सौफ स स्तब्धता मोक्षः शुक्रस्य तु विशेषतः॥५६॥ वर्षाशार द्वसंतेषु वात
प्रकलः क्रमात्॥ वेकलोन्यः सदुःसाध्यः प्राकृतश्चानिलोद्भवः॥७५॥ ॥ अथम
ज्जागतज्वरमाह॥ तन्मप्रवेशान्नं धकार प्रविष्टस्ये व संविति। महाश्वासनिदाने वक्ष्य
माणलक्षणः॥ मर्मशब्दे न हृदयमुच्यते॥ प्राधान्यादिति कार्तिकः॥ तस्य छेदइवम
र्मच्छेदः॥ शुक्रगतलक्षणमाह॥ तत्रएतेषु रसादिधातुगतज्वरेषु मध्ये शुक्रस्थ
नगते ज्वरे मरणं प्राप्नुयादिति योज्यं॥ शुक्रं चलस्थानं चेति शुक्रस्थानं॥ ननु
शुक्रगते ज्वरे मरणमिति कस्मात्॥ तच्च शुक्रं सर्वदेहगं तलश्च रसादिधातुविप
वेन पि॥ शुक्रप्रासे तज्ज्वले पि मरणमिति॥ नैव सर्वशरीरगतस्यापि शुक्रस्य

॥२१॥

चकालांतरितत्वेन त्वचं क्रमेण प्राप्तिः॥ क्रमात् पिशुक्तं ज्वरेण कथं प्राप्य तद् इति चे
त्धात्वंतरारतिक्रम्य शुक्रगमनादिति॥ विशेषइतिपदेन शुक्रस्य बाहुल्येन वि
सर्गः॥ अन्यस्यापि रक्तादेरपि बाहुल्येन वर्तंति॥ उक्तं च सुश्रुते॥ रसं धनीय याव
द्धातिन्स्त्वा यथा विषं हेतकस्माव जेच्छांति देहं हत्वा यथा ज्वरः॥ ॥अथ का
लभेदेन ज्वरस्य साध्यासाध्य लक्षणमाह॥ वर्षादिषु रुलुषु वालाद्येः क्रमात्
यो ज्वरः॥ प्रकृतः वर्षासु वातिकः॥ वसंत श्लेष्मिकः॥ अस्मादन्यो वैकृत॥ यथा
वर्षासु पैत्तिकः॥ शरदि श्लेष्मकः॥ वसंते वातिकः॥ इति वैकृतेरुः साध्यः॥ अत
एव जर्या सुखसाध्यः प्राकृत इति॥ यदुक्तं॥ प्राकृतः सुखसाध्यस्तत्र वसंत
शरद्भवः॥ अनिलोन्द्रव प्राकृत स्यादुः सो साध्य इति॥ ७५॥ ७७॥ ७७॥ ७७॥

शारदीपे तिना

॥२१॥

वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरं॥ कुर्यात् पित्तं शरदि तस्य चानु
बलः कफः॥ ७६॥ तत्प्रकृत्या विसर्गात्र तत्र नानशनाद्भयं॥ कफो वसं

७६

तैलमपि वातपित्तं भवेदनु॥७७॥ तेषामेव प्राकृतज्वराणां चिकित्साविशेषार्थमनुप
त्तिक्रममाह॥ ग्रीष्मे संचितत्वात् वर्षासु प्रकुपितो वायुः पित्तश्लेष्मान्वितज्वरं कु
रोति॥ तत्कालोचितवातपित्तकफानुबंधं ज्वरं कुर्यात्॥ यदुक्तं॥ भूवाष्पान्मेघनिष्यंदा॥
त्पाकाम्लाज्जनस्य च॥ वर्षास्वग्निबले हीने कुप्यंति पवनादयः इति॥ कुपितापि
त्तं शरदि दुष्टं ज्वरं कुर्यात्॥ अनुपूर्वोऽर्केन संबध्यते॥ एवं कफो वसंते तत्रापि
योऽन्यं॥ पित्तं दुष्टं च शरदि वर्षासु संचितत्वेनेति॥ तस्य पित्तस्य अनुबलो अनु
बंधः कफः॥ ॥ तयोः पित्तश्लेष्मणोः प्रदुष्टयोः स्वभावत्वेन तत्प्रकृतयोः ज्वरयोः
अनशनाल्लंघनाद्भयं भवति॥ यदुक्तं॥ कफपित्तौ द्वये धातू न सहते लंघनं म
हत्॥ कस्माद्विसर्गाख्यहेतोः न अनशनाल्लंघनाद्भयं॥ वर्षाशरत् हेमंताः विस
र्गकालाः॥ तत्रोपचितबलाः प्राणिनो भवंति॥ सोमबलत्वात्॥ शिशिर वसंत
ग्रीष्मास्तु आदानं आदानकालाः प्राणिनोऽपभवंति॥ तत्रोपचितबलाः सूर्य

ग्र

तत्प्रकृत्या कफप्रकृत्या विसर्गस्ये
बलत्वात् ॥ तत्प्रकृत्या विसर्गस्येति पाठांतरं ॥ तत्प्रकृत्या कफप्रकृत्या विसर्गस्ये
॥३२॥ वप्रकृत्येति योज्यं ॥ वसंते तु कफं अनुबालपित्तेऽप्यबलः ॥ अनुबंधरूपेणापि बलवद्
र्थः ॥ हेतुश्चात्र वसंतस्य आदानमध्ये त्वग्नेः रूक्षत्वात् ॥ वातपित्तप्रकोपनं ॥
मृदुलेचनके ॥ आदानमध्येतस्यापि वालपित्तमनवेदनुद्भूतिः ॥ अतः कफपित्तप्रद
सौलंघनं सुकमेव ॥ किं त्वादानमध्यमत्वेन यतो निर्णयं तत्कार्यं ॥ अतु एव
तेत्र नानद्वाना नद्यमिति ॥ तस्मात्पूर्वमेव पठति ॥ अन्यथा सर्वं चोषेपहि
तस्यादिति ॥ ७७ ॥ ८० ॥ ८१ ॥ कालेयथास्वं सर्वेषां प्रवृत्तिर्वृद्धिरेव वा ॥ नि
दानोक्तोनुपशयो विपरीतोपशायितः ॥ ७८ ॥ अंतराहोऽधिकाल्हारप्रलस्य स्थ
सनं श्रमः ॥ संध्यास्थि शूलं स्वेदो दोषवर्चो विनिग्रहः ॥ ७९ ॥ अंत वेगस्य ॥३२॥
लिंगानि ज्वरस्येतानि लक्षयेत् ॥ संतापोऽप्यधिकोवास्य तृष्णादीनां च मा
र्दवं ॥ ८० ॥ कालेस्वमिति ॥ यथास्वं काले वातादेः यः प्रकोपकालस्तत्र तत्र

[OrderDescription]
,CREATED=18.10.20 15:39
,TRANSFERRED=2020/10/18 at 15:48:13
,PAGES=64
,TYPE=STD
,NAME=S0004139
,Book Name=M-1864-MADHAVNIDANAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,